	कुमारीआसवः	२–२॥ कर्षः	जलम्
हृद्जन्ये उदरे	हृद्यपत्रचूर्णम्	१–४ गुंजा	जलम्
	दशमूलक्वाथः	१–२ कर्षः	मधु
	आरोग्यवर्धनीरसः	३–६ गुंजा	दुग्धम्
	पुनर्नवासव, दशमूलासव,– कुमारीआसव मिश्रणम्	२–६ कर्षः	
जलोदरम्	पुनर्नवादिक्वाथः	१-२ कर्षः	मधु
	दशमूलक्वाथः	,,	,,
	पुनर्नवाचूर्णम्	२–४ माषाः	जलम्
	दन्ती ,,	,,	,,
	हरीतकीचूर्णम्	०॥–२ कर्षः	गोमूत्रम्
	इच्छाभेदीरसः	१–३ गुंजा	जलम्
	अश्वकंचुकीरसः	,,	,,
	जलोदरारिरसः	१ ,,	,,
	नाराचरसः	,,	,,
	आरोग्यवर्धनीरसः	,,	गोमूत्रम्
	क्षारगुटिका	३–६ गुंजा	जलम्
	स्नुहीघृतम्	१–२ माषाः	दुग्धम्

प्रकारः	योगः	मात्रा	अनुपानम्
	स्नुहीघृतभावित–		
	त्रिवृत्चूर्णम्	३–६ गुंजा	जलम्
	स्नुक्पल्लवशाकभक्षणम्–		
	माणकंदपेया[1]		
बद्धगुदोदरम् छिद्रोदरम्	शस्त्रकर्मसाध्ये		

शोथरोगः

प्रकारः	योगः	मात्रा	अनुपानम्
वातजः	दशमूलक्वाथः	१–२ कर्षः	मधु
	शिवाचूर्णम्	०।–०॥ ,,	गोमूत्रम्
	त्रिफलाद्यरिष्टः	१–२ ,,	जलम्
पित्तजः	कटुकीचूर्णम्	०।–०॥ ,,	,,
	आरोग्यवर्धनीरसः	३–६ गुंजा	गोमूत्रम्
कफजः	पुनर्नवादिक्वाथः	१–२ कर्ष	मधु
	हरीतकीचूर्णम्	०।–०॥	गोमूत्रम्
	गुडार्द्रकयोगः (चरक)		
	शिलाजतुरसायनम्		
	आरोग्यवर्धनीरसः	३–६ गुंजा	गोमूत्रम्
	दुग्धवटी	१–३ ,,	दुग्धम्
	पुनर्नवामंडूरः	३–६ ,,	गोमूत्रम् वा तक्रम्
हृद्जन्यः	हृद्यपत्रचूर्णम्	१–३ ,,	पुनर्नवादिक्वाथः
	आरोग्यवर्धनीरसः	३–६ ,,	गोमूत्रम्
	हृदयचिंतामणिरसः	१–३ ,,	मधु
वृक्कजन्यः	इक्षुरकमूलक्वाथः	१–२ कर्षः	
	अयोरजस्त्र्यूषणयावशूकं मूत्रं च पीतं त्रिफलारसेन (चरक)		
	शिलाजतु	०।–०॥ कर्षः	उष्णदुग्धम्
शोथे बाह्योपचारः	काकमाचीस्वरसः		
	धत्तूरस्वरसः		

१–माणककल्कक्वाथाभ्यां द्विगुणीकृत तण्डुलम्
साधितं क्षारतोयाभ्यां अभ्यस्येत् पायसं तु तत् (च. द.)

प्रकारः	योगः	मात्रा	अनुपानम्
	अग्निमन्थस्वरसः		
	पुनर्नवालेपः		
	दशांगलेपः (पित्तजे शोथे)		
	दोषघ्नलेपः (कफजे शोथे)		
	बिभीतकफलमज्जालेपः		
	उमा–उपनाहः		
	वातघ्नपत्रस्वेदः		

वृद्धिरोगः

सामान्य-चिकित्सा	हरीतकीचूर्णम्	०।–०॥ कर्षः	गोमूत्रम्
	गोमूत्रक्लिन्न–हरीतकीचूर्णम्	,,	,,
	एरण्डतैलम्	१–२॥ कर्षः	,,
	एरण्डमूलक्वाथः	१–२ कर्षः	मधु
	अर्कमूलक्वाथः	,,	,,
	तृणपंचमूलक्वाथः	,,	,,
	कुबेराक्षचूर्णम्	२–४ माषाः	गोमूत्रम्
	विशालामूलचूर्णम्	,,	,,
	वृद्धिबाधिकावटी	१–३ गुंजा	पुनर्नवाष्टकक्वाथः
	आरोग्यवर्धिनीरसः	,,	गोमूत्रम् वा पुनर्नवादिक्वाथः
बाह्योपचारः	शिलारसलेपः		
	अर्कमूलकल्कलेपः		
	ऐलेयलेपः		
	पूतिकरंजबीजलेपः		

गलगण्डरोगः

जलकुम्भीभस्म
गिरिकर्णिकामूलम्
तिक्तालाबुफले जलं मद्यं वा पातव्यम्
दग्धसर्पमसीप्रलेपः
मालाकंदः भक्षणे प्रलेपने च

प्रकारः	योगः	मात्रा	अनुपानम्:
गण्डमाला			
अपची	निर्गुण्डीमूलनस्यम्		
	शाखोटकतैलनस्यम्		
	निम्बतैलनस्यम्		
	गुंजातैलनस्यम्		
	कोषातकीनस्यम्		
	आरग्वधमूलनस्यम्		
	वर्धमानपिप्पलीयोगः		
	अलम्बुषास्वरसः	२ कर्षः	मधु
	वरुणक्वाथः	१–२ ,,	,,
	काञ्चनारगुग्गुलुः	३–६ गुंजा	वरुणक्वाथः
	गण्डमालाकंडनरसः	१–३ ,,	,,
बाह्योपचारः	भारंगमूललेपः		
	वाकेरीमूललेपः		
	गुंजालेपः		
	मालाकन्दप्रलेपः		
ग्रंथि अर्बुद	शस्त्रकर्मोपचारः		

श्लीपदरोगः

प्रकारः	योगः	मात्रा	अनुपानम्:
नवोत्थिते सामान्य चिकित्सा	शाखोटकक्वाथः	१–२ कर्षः	मधु
	अर्कमूलत्वक्क्वाथः	०।–०॥ ,,	,,
	पूतीकरंजपत्ररसः	१ ,,	,,
	हरीतकीचूर्णम्	०।–०॥ ,,	गोमूत्रम्
	गंधकरसायनम्	,,	दुग्धम्
	महायोगराजगुग्गुलुः	६–१२ गुंजा	मंजिष्ठादिक्वाथः
	नित्यानंदरसः	१–३ ,,	गोमूत्रम्
बाह्योपचारः	धत्तूरलेपः		
	वंध्याकर्कोटकीलेपः		
	चित्रकलेपः		
	पूतिकरंजलेपः		
	अर्कमूलत्वचं शुक्ते पिष्ट्वा लेपः कार्यः		

विद्रधिरोगः

प्रकारः	योगः	मात्रा	अनुपानम्
सामान्य-चिकित्सा	शिग्रुक्वाथः	१–२ कर्षः	मधु
	वरुणक्वाथः	,,	,,
	मंजिष्ठादिक्वाथः	,,	,,
	वरुणादिक्वाथः	,,	,,
	त्रिफलाचूर्णम्	०।–०॥ कर्षः	जलम्
	आरोग्यवर्धनी	६–१२ गुंजा	वरुणादिक्वाथः
	चंद्रप्रभावटी	,,	,,
	शिलाजतु	०। कर्षः	,,

व्रणशोथरोगः

सामान्य-चिकित्सा	दशांगलेपः		
	दोषघ्नलेपः		
	उमालेपः		
	कृष्णमलहरपट्टी		

भगंदररोगः

	नारसिंहचूर्णम्	२–४ माषाः	घृत+मधु
	गुग्गुलुः	,,	पुनर्नवादिक्वाथः
	त्रिफलागुग्गुलुः	,,	,,
	निम्बतिलवर्तिः		
	क्षारसूत्रम्–क्षारकर्म		
	करवीरतैलम्		
	निम्बतैलम्		
	कोषातक्यादितैलम्		
	भगंदरारिमलहरः (आ. नि. मा.)		

कुष्ठरोगः

सामान्य-चिकित्सा	खदिरत्वक्कषायः	१–२ कर्षः	मधु
	निम्बस्वरसः वा क्वाथः	,,	,,

प्रकार:	योग:	मात्रा:	अनुपानम्
	बाकुचीक्वाथ:	१–२ कर्ष:	मधु
	तुवरक बीजं वा तैलम्	—	—
	हरिद्राक्वाथ:	,,	,,
	आरग्वधक्वाथ:	,,	,,
	गुडूचीक्वाथ:	,,	एरण्डतैलम्
	सारिवाक्वाथ:	,,	,,
	महामंजिष्ठादिक्वाथ:	२–४ माषा:	घृत+शर्करा
	गंधकरसायनम्	,,	दुग्धम्
	महातिक्तघृतम्	१ कर्ष:	,,
	तालसिन्दूरम्	१–२ गुंजा	मधु
	हरितालम्	,,	,,
	पंचतिक्तघृत गुग्गुलु:	१–२ कर्ष:	दुग्धम्
	महायोगराजगुग्गुलु:	३–६ गुंजा	दुग्धम् मंजिष्ठादिक्वाथ:
	फलत्रिक ,,	,,	,,
	आरोग्यवर्धनी	,,	,,
	खदिरासव:	१–२ कर्ष:	जलम्
	मध्वासव:	,,	,,
	लोध्रासव:	,,	,,
कुष्ठे बाह्योपचार:	करंजतैलम्		
	तुवरक ,,		
	बाकुची ,,		
	निम्ब ,,		
	करवीर ,,		
	तिक्तघृतम्		
	धौतघृतम्		
श्वित्रकुष्ठ:	गिरिकर्णिकामूललेप:		
	सर्पमसी+बिभीतकतैललेप:		
	बाकुची, हरिताल,– कासीस, मन:शिला– भृंगराज लेप: (भा.प्र.)		

प्रकारः	योगः	मात्रा	अनुपानम्
दद्रुः	ऐडगजबीजचूर्णम्		निम्बूरसः तक्रं वा
	ऐडगज–करंजलेपः		
	हरीतकीचूर्णम्	०।–०॥ कर्षः	जलम्
	मंजिष्ठादिक्वाथः	१–२ ,,	मधु
	दद्रुघ्नसोगठी	लेपः	निम्बुस्वरसः
कच्छू	शुद्धबलिचूर्णम्	२–४ माषाः	कदलीफलम्
(स्केबीज़; इच)	सारिवाचूर्णम्	,,	जलम्
	हरीतकी ,,	,,	,,
	मंजिष्ठादिक्वाथः	१–२ कर्षः	मधु
	केवल शर्कराप्रयोगः	यथाबलम्	जलत्यागः
बाह्योपचारे	बलिमलहरः		
	पामाहर पावडर		
किटिभकुष्ठः	आरग्वधत्वक् पत्रं वा लेपार्थं		
(सोराइसीस)	रक्तशुद्धियोगः (र. र. समुच्चयः)		
	आरग्वधक्वाथः		
	आरग्वधत्वक् कषायः		
	पञ्चतिक्तघृत गुग्गुलु (चक्रदत्त) १–२ कर्षः		
पामा–(वीपिंग एग्ज़ीमा)			
बाह्योपचारः	खर्परमलहरः		
	मदयन्तिकापत्रकल्कलेपः		
	रसपुष्प–बटाटायोगः		
	सूक्ष्मशिवाचूर्णस्य जलेन सह लेपः ।		
हस्तिचर्म–चर्मकुष्ठः	पारदादिमलहरः		
(ड्राई एग्ज़ीमा)	नारिकेलतैलम्		
	नारिकेल कवच चुआ (पातालयंत्र तैलम्)		
	भल्लातकतैलम्		

शीतपित्त–उदर्द–कोठरोगाः

शीतपित्तम्	मत्स्याचूर्णम्	३–६ गुंजा	शर्करा+जलम्
	अविपत्तिकरचूर्णम्	२–४ माषाः	जलम्

प्रकार:	योग:	मात्रा	अनुपानम्
	स्वादिष्टविरेचनचूर्णम्	२–४ माषाः	,,
	अर्कदुग्धभावित–प्रवालपिष्टि:	०॥ गुंजा	वासाचूर्णम्–घृतम्
	गोदन्तीभस्म+गैरिकम्	२–४ माषाः	शर्करा+जलम्, घृत+शर्करा
	मरिचचूर्णम्	३–६ गुंजा	घृत+शर्करा
	संजीवनीवटी	३–६ गुंजा	दुग्धम्
	सूतशेखररस:	१–३ ,,	आर्द्रकं+मधु
	कामदुघारस:	,,	,,
	हरिद्राखण्डम्		
बाह्योपचारे	प्रियाल दुग्धलेप:		
	अरण्योत्पलभस्मलेप:		
	स्वर्जिकाक्षारमिश्रितजलप्रलेप:		

अम्लपित्तरोग:

सामान्य चिकित्सा	निम्बपत्रस्वरस: ५ कर्ष:	वमनार्थे	
	मदनफलमज्जा १/४ कर्ष:	,,	
	मत्स्याचूर्णम्	३–६ गुंजा	शर्कराजलम्
	अविपत्तिकरचूर्णम्	०।–०॥ कर्ष:	,,
	त्रिवृत् ,,	२–४ माषाः	,,
	दन्तीमूल ,,	,,	,,
	शंखभस्म, शठीचूर्णम्, स्वर्जिकाक्षार: } त्रयाणां मिश्रणम्	२–४ माषाः	,,
	सूतशेखररस:	१–३ गुंजा	आर्द्रकं+मधु
	कामदुघारस:	,,	,,
	कल्याणवटका:	०।–०॥ कर्ष:	जलम्
	कूष्माण्डअवलेह:	१ कर्ष:	दुग्धम
	सुधाम्बु	२ ,,	,,

विसर्प-विस्फोटकौ

प्रकारः	योगः	मात्रा	अनुपानम्
चिकित्सासूत्रम्	आदौ एव विसर्पेषु हितं लंघन रूक्षणम् । रक्तावसेको वमनं विरेकः स्नेहनं न तु ॥ (अ. हृ. चि. अ. १८)		
	निम्ब स्वरसः	५ कर्षः	जलम्
	गुडूची निर्यूहः	,,	,,
	मंजिष्ठादिक्वाथः	३–२ कर्षः	मधु
	बलिरसायनम्	२–४ माषाः	दुग्धम्
	मुक्तापिष्टिः	३–६ गुंजा	,,
	प्रवालपिष्टिः	,,	,,
विसर्पज्वरे			
	आमलकस्वरसः घृतमिश्रितः ॥[1]		
बाह्योपचारे :	शुण्ठीलेप		
	काकमाचीस्वरसः		
	दशांगलेपः		
	शतधौतघृतलेपः		
	चंदनकर्पूरलेपः		
	गैरिक+खर्पर+अश्वत्थत्वक्		
	गुलेअरमनी–कृष्णमृत्तिकालेपः		

मसूरिका, रोमान्तिका, शीतलिका रोगाः

चिकित्सा विसर्पवत्

उपदंश फिरंग रोगौ

उपदंशः	मंजिष्ठादिक्वाथः	१–२ कर्षः	मधु
	सारिवाचूर्णम्	२–४ माषाः	जलम्
	अष्टमूर्तिरसः	१–२ गुंजा	मंजिष्ठादिक्वाथः
	अमीररसः	१ गुंजा	शीरा
	केसरादिवटी	१–३ गुंजा	दुग्धम्
	मल्लसिन्दूरम्	१ गुंजा	,,
	भैरवरसः (भै. र.)		
	रसगुग्गुलुः	२–४ माषाः	,,

१ रसमामलकाद्वा घृतमिश्रं ज्वरापहम् (चि. चि. ११)

प्रकारः	योगः	मात्रा	अनुपानम्
बाह्योपचारे	जात्यादिघृतम्		
	रसपुष्पमलहरः		

क्षुद्ररोगाः

अजगल्लिका	मलमार्गमार्जनम्		
	खर्परमलहरः		
	यशदपुष्पम्		
यवप्रख्या विवृता कच्छपिका	कांचनारगुग्गुलुः		
वल्मीक इन्द्रविद्धा गर्दभिका	शस्त्रकर्म		
पाषाणगर्दभः (मम्स)	शिग्रुलेपः; वरुणशिग्रुलेपः		
	दोषघ्नलेपः		
	अतसीलेपः		
	गुलेअरमनोलेपः		
	ज्वरघ्नक्वाथः	१–२ कर्षः	मधु
	ज्वरघ्नीवटी	३–६ गुंजा	गुडूचीक्वाथः
पनसिका जालगर्दभ	विसर्पवत्		
कदर चिप्प अनुशयी विदारी शर्करार्बुद	शस्त्रकर्म		
पाददारी	मंजिष्ठादिक्वाथः	१–२ कर्षः	मधु
बाह्योपचारः	जीवन्त्यादि मलहरः, शतधौतघृतम्		
	कोकम (वृक्षाम्ल) घृतम्		
	एरण्डतैलम्		

प्रकारः	योगः	मात्रा	अनुपानम्
अलसक (वेढापाक)	पाददारिकावत्		
इन्द्रलुप्तम्	हस्तिदन्तमसी+रसांजनलेपः		
	रसांजनम् लेपार्थे		
	कासीसम् ,,		
	भृंगराजः ,,		
दारुणकः	इन्द्रलुप्तसदृशचिकित्सा		
रुही–रुध्या			
खालित्यम्	इन्द्रलुप्तवत्		
अरुंषिका	निम्बतैलमर्दनम्		
	पारदादिलेपः		
	कुष्ठ+कंटकारी अंतर्धूमभस्म–निम्बतैलेन लेपः		
पलितम्	भृंगराजलेपः		
	निम्बतैलनस्यम्		
यौवनपिटिका	शाल्मलीकंटकानि मसूरविदलं च लेपः		
	लोध्र+वचा+आम्रहरिद्रालेपः		
	त्रिफलाचूर्णम्	०।–०॥ कर्ष	जलम्
	मंजिष्ठादिक्वाथः	१–२ ,,	मधु
	सुधापर्पटी (केल्शियम सल्फेट)	१–२ वल्लाः	जलम्
पद्मिनीकंटकः	वमनं कार्यम्		
जतुमणि			
मशक	कर्तनम्		
तिलकालक, न्यच्छ, व्यंग, नीलिका	जातीफलम्–दुग्धेन सह लेपः इंगुदीफलमज्जालेपः		
परिवर्तिका, अवपाटिका, निरुद्धप्रकश, सन्निरुद्धगुद	शस्त्रकर्मसाध्य		

प्रकारः	योगः	मात्रा	अनुपानम्
अहिपूतना	निम्बतैललेपः		
	खर्परमलहरलेपः		
गुदभ्रंशः	कुकुंदरतैलम्, कासीसद्रवः, स्फटिकाद्रवः — बाह्योपचारः		
	कोमल कमलदल भक्षणम् शर्करा सहितम्		
ओष्ठगतरोगाः	जात्यादितैलम्, इरिमेदादितैलम्, जीवन्त्यादिघृतम् — बाह्योपचारः		
दन्तमूलगताः रोगाः			
दन्तवेष्टकः, शीतादः, दन्तपुप्पुटः, उपकुशः, दन्तनाडी	जात्यादितैलम्, इरिमेदादितैलम्, पायोरिया प्रवाही — बाह्योपचारः, यष्टिमधु कल्क कवलग्रहः घृतेन सह, सौराष्ट्री+रसांजन गण्डूषः		
	सैरेयकक्वाथगण्डूषः		
	त्रिफलागुग्गुलुः	४–८ गुंजा	घृत–मधु
	प्रवालभस्म	२–४ ,,	,, गुलकंद
कृमिदन्तः	फलत्रिकचूर्णम्	२–३ माषाः	घृत+मधु
	रसोनादिवटी	२–३ ,,	जलम्
	पारसीकयवानी+गोदन्ती	१–२ ,,	,,
	उत्तरभक्ति स्नेहपानम्		
	कंटकारीबीजधूमः		
	इरिमेदादितैलपिचुधारणम्		
	लवंगतैल पिचुधारणम्		
जिह्वारोगाः, मुखपाकः	शोणित मोक्षः		
	रसवन्ती+सौराष्ट्री–गण्डूषः		
	गुडूचीकल्कधारणम्		
	गुंजापत्रकल्कधारणम्		
	गैरिकचूर्ण प्रतिसारणम्		
	इरिमेदादितैलप्रतिसारणम्		
	फलत्रिकचूर्णम्	२–३ माषाः	जलम्
	मंजिष्ठादिक्वाथः	१–२ कर्षः	मधु

प्रकारः	योगः	मात्रा	अनुपानम्
गलरोगः	रजतद्रवप्रतिसारणम्		
(गिलायु	मेंडल्सपेइन्टप्रतिसारणम्		
गलशुण्डी	कंकोल+यष्टिमधु प्रतिसारणम्		
गलग्रहः)	त्रिकटु+कासीसप्रतिसारणम् (सुश्रुत.)		
	कालकचूर्णम्		
	पीतक ,,		
	दार्वी+सोराष्ट्री गण्डूषः		
	इरिमेदादि तैल प्रतिसारणम्		
	ग्लिसरीन टेनिक प्रतिसारणम्		
	टंकणमधु प्रतिसारणम्		
	मंजिष्ठादिक्वाथः	१–२ कर्षः	मधु
	फलत्रिकचूर्णम्	०।–०॥ कर्षः	,,
	कट्फलादिचूर्णम्	०। कर्षः	,,
	सितोपलादिचूर्णम्	,,	,,
	तालीसादि ,,	,,	,,
	त्रिभुवनकीर्तिरसः	३–६ गुंजा	,,
	खदिरादिवटी / लवंगादिवटी } मुखे धारणार्थम्		

नेत्ररोगाः

	लंघनम् । विरेचनम् ।		
अभिष्यन्दः	रसवन्तीद्रवः	आश्च्योतनम्	
	पलाशपुष्परसक्रिया	,,	
	शिग्रुपत्रस्वरसः समभाग मधुयुक्तः	,,	
	कुस्तुम्बरी स्वरसः	,,	
	बिडालकलेपः		
	दशांगलेपः		
	टंकणाम्लस्वेदः		
	(बोरिक एसिड)		
	त्रिफलाक्वाथधावनम्		
	मंजिष्ठादिक्वाथः	१–२ कर्षः	मधु
	फलत्रिकचूर्णम्	०।–०॥ ,,	,,

प्रकारः	योगः	मात्राः	अनुपानम्
अधिमन्थः	अभिष्यन्दवत् क्रिया		
	उत्तरभक्तिकः स्नेहः वेदनाशमनार्थे		
	इसरीनद्रव आश्च्योतनम्		
	शंखप्रदेशे विस्फोट जननम्		
	शिरोवस्तिधारणम् (वातहरद्रव्यक्वाथः; घृतम् इत्यादि)		
अक्षिपाकः	जात्यादिअंजनम् (सुश्रुत)		
(हायपोपिअन)	पैत्तिकाभिष्यन्दवत्		
अंजननामिका	सिन्दूरलेपः		
	रजतद्रवप्रतिसारणम्		
	टंकणाम्लस्वेदः		
	बिडालकलेपः		
	त्रिफलाचूर्णम्	०।–०।। कर्षः	मधु
अर्जुनः	सैन्धवेन कतकफलम् – अंजनम्		
(सब कंजंक्टा-	रसवन्तीद्रव आश्च्योतनम्		
इवल हेमोरेज)	शंखः, मधुना अंजनम्		
	त्रिफलाचूर्णम्	०।–०।। कर्षः	दुग्धम्
पोथकी	तुत्थप्रतिसारणम्		
(ખીલ,	मृदुरजतद्रवप्रतिसारणम्		
ट्रेकोमा)	शर्कराप्रतिसारणम्		
	चन्द्रोदयावर्तिः अंजनम्		
	टंकणाम्लस्वेदः		
	रसकर्पूरद्रवधावनम्		
	वासादिक्वाथः		
	(शार्ङ्गधरः)	१–२ कर्षः	मधु
	मंजिष्ठादिक्वाथः	,,	,,
	फलत्रिकचूर्णम्	०।–०।। कर्षः	दुग्धम्
पिल्लरोगः+			
प्रक्लिन्नवर्त्म	तुत्थप्रतिसारणम्		
(ब्लेफराइटिस)	रजतद्रवप्रतिसारणम्		
	रसवन्तीद्रवआश्च्योतनम्		
	पीतमलहरः (येलो ऑइन्टमेन्ट)		
	चन्द्रोदयावर्तिः- अंजनम्		

प्रकारः	योगः	मात्रा	अनुपानम्
शुक्रम् अव्रणम्	चन्द्रोदयावर्तिः अंजनम्		
	वटक्षीर+कर्पूर ,,		
	शृंगः–अंजनम्		
	नृसारद्रवः आश्च्योतनम्		
	पीतमल्हरः (येलो ऑइंटमेंट)		
	सप्तामृतलोहः	३–६ गुंजा	घृत+मधु
सव्रणशुक्रम्	रजतद्रव प्रतिसारणम्		
	आर्जीरोल		
	रसवन्तीद्रव आश्च्योतनम्		
	शिग्रुघनद्रव आश्च्योतनम्		
	बब्बुलरसक्रिया—अंजनम्		
	एट्रोपीनद्रवः आश्च्योतनम्		
	दुग्धसूचीवेधः		
	सप्तामृतलोहः	३ ६ गुंजा	घृतं+मधु
	धात्रीचूर्णम्	०। कर्षः	दुग्धम्
रात्र्यान्ध्यम्	चन्द्रोदयावर्तिः	हरेणुमात्रा	मधुनांजनम् रात्रौ
	अजायकृति भृष्टा पिप्पली	अंजनम्	मधुना
	यकृद्भक्षणम्	द्वि-पलम्	
	त्रिफलाचूर्णम्	२ माषौ	घृतम्+मधु
	भुजंगवसा	अंजनम्	
	जीवन्तीशाकम्	घृतभृष्टम्	भोजने
शुक्तिका	एरण्डस्नेहाश्च्योतनम्	१–२ बिंदवः	प्रातः
	कतकफलं सैन्धवेन मधुना च	अंजनम्	सायं
	स्वर्णवसंतः	३–६ गुंजा २ वारम्	नवनीतशर्कराभ्याम्
अर्मरोगे	चन्द्रोदयावर्ति	अंजनम्—घर्षणम् च	
काचरोगे च	,,		
	गुडूचीरसक्रिया	अंजनम्	(शार्ङ्गधरः)
	पलाशमूलार्कः	,,	
	सप्तामृतलोहः	२–४ वल्लाः	घृतं-मधु
अलजीपर्वणी	रसवंतीद्रवाश्च्योतनम्		
	रसपुष्पावचूर्णनम्		

कर्णरोगाः

प्रकारः	योगः	मात्रा	अनुपानम्
कर्णस्रावः	विष्णुपदामृतेन, सुराष्ट्रजाद्रवेण वा धावनम्		
	समुद्रफेनचूर्णप्रक्षेपः-नीबुद्रवानुक्षेपः		
	रसवंतीद्रवः पूरणे		
	पूर्वम् शोधन तैलम् कर्णपूरणे; अनंतरम् रोपणतैलम् (इरिमेदादि तैलम्);		
	पंचगुणतैलम् कर्णपूरणे		
	त्रिफलाचूर्णम्	१-५ माषाः	मधु-घृताभ्याम्
	रसायन ,,	२-४ ,,	दुग्धेन
	अभ्रक+बंग+प्रवालयोगः	१-६ गुंजा	घृतं-मधु
पूतिकर्णः कृमिकर्णश्च	कर्णस्रावहराः योगाः यवानीपुष्पचूर्णप्रक्षेपः, नीलगिरितैलप्रक्षेपः		
	त्रिफलागुग्गुलः	२-४ वल्लाः द्विवारम् अधोभक्तम्	घृतम्-मधु
कर्णस्वेदः कर्णनादःच	कर्णानंदतैलं पूरणे अपामार्गक्षारतैलं पूरणे		
	गोदंती+नवायसलोहः	२-३ वल्लाः	घृत-मधु
	योगराजगुग्गुलः	२-४ ,, अधोभक्तम्	घृतम्-मधु
	बाताम, खाखस, मरीचानां पेया, दुग्धेन		
	विषतिन्दुकवटी	२-३ गुंजा ,,	घृतेन
	उष्ण सर्षपतैलपूरणम्		
बाधिर्यम्	कर्णानंदतैल पूरणम्		
	मुसलीबाकुचीचूर्णम्		
	स्वर्णयोगराजः	२-४ गुंजा अधोभक्तम्	घृतमधु
	विषतिन्दुकवटी	३-६ ,, ,,	घृतेन
	रसायनचूर्णम्	२ माषौ	दुग्धेन
	सारिवादिवटी	,,	जलम्
कर्णशूलः	कर्णानंद तैलम् पूरणे		
	क्षार तैलम् ,,		
	दीपिकातैलम् ,,		
	लशुन तैलम् ,,		
	पक्वस्य अर्कपत्रस्य स्वरसः पूरणे		
	कंटकारीचूर्णधूमः		

प्रकारः	योगः	मात्रा		अनुपानम्
	अहिफेनासवः पूरणे (सिडेटिव ड्रॉप्स)			
	तापस्वेदः, नाडीस्वेदः च			
	सर्पगन्धाघनवटी	२–६ गुंजा	अधोभक्तम्	जलम्
	वेदनान्तकरसः	१ ,,		दुग्धेन
	पारसीकयवानीचूर्णम	१–३ ,,		,,

नासारोगाः

पीनसः	लवणजल प्रक्षालनम्			
	रक्तस्फटिकद्रवेण प्रक्षालनम्			
	पंचगव्यघृतनस्यम्			
	षड्बिन्दुनस्यम्			
	समीरपन्नगः	१/४–१/२ गुंजा	अधोभक्तम् २ वारम्	घृतं+क्षीरम्
	व्योषादिवटी	३-६ गुंजा	,,	जलेन
	तालीसादिचूर्णम्	३–६ वल्लाः	प्रातः–सायं	घृतेन
	सितोपलादिचूर्णम्	,,	,,	मधुना घृतेन वा
	अभ्रकं+प्रवालं+यशदं च	३ गुंजा	,,	,,

गुडमरिचविमिश्रं पीतमाशु प्रकामम् ।
हरति दधि नराणां पीनसं दुर्निवारम ॥ (यो. र.)

नासापाकः	पद्मकादितैलनस्यम् (चिकित्साप्रदीपः)		
	रसवंतीद्रवनस्यम्		
	दशांगलेपः		
	प्रवालभस्म	२–६ गुंजा	
	वासावलेहः	१–२ माषाः	
	वासादिक्वाथः (शार्ङ्गधरः)	१–२ पलम्	मधुना
पूतिनस्यम्			
पूयरक्त म्	नासापाकवत् चिकित्सा		
	रक्तनस्यमः पश्चात् प्रधमननस्यम्		
भ्रंशथुः	पीनसवत्		

प्रकारः	योगः	मात्राः	अनुपानम्
क्षवथुः	पंचगव्य घृतं नस्यार्थे		
	षड्बिन्दु तैलम् (योगरत्नाकर)		
	घृतपानम्		
	एलादिघृतम्	२—४ माषाः	
	घृत गुग्गुलु मिश्रितस्य सिक्थकस्य धूमः		
दीप्तम्	निम्बपत्रस्वरस+रसवन्तीद्रवः नस्यार्थे		
	दशांगलेपः		
प्रतिनाह	एरण्डतैलम् नस्यार्थे		
(क्रॉनिक नेज़ल	गृहधूमादितैलम् (शा. सं.) नस्यार्थे		
केटार)	सर्पिष्पानम्		
	तालीसादिचूर्णम्	१—२ माषाः	घृत—मधु
	हरिद्राधूमः		
नासास्रावः	एरण्डतैलनस्यम्		
	षड्बिन्दुनस्यम्		
नासास्रावः	कर्पूरशिला +		
	तालीसादिचूर्णम्	१—२ माषाः	घृतमधु
	त्रिकटुचूर्णम्	,,	,,
नासाशोषः	गोघृतनस्यम् ससैन्धवम्		
प्रतिश्यायः	तालीसादिचूर्णम्	१-२ माषाः	घृतं+मधु
(वातिक)	शिवात्रयी ,,	,,	जलम्
	त्रिकटु ,,	,,	घृत+मधु
	कण्टकार्यादिक्वाथः[१]		मधु
	श्वासकुठारः	२-३ गुंजा	आर्द्रकस्वरसः
	गुडशुण्ठी नस्यम्		
	अजमोदाधूमयोगः		
	उष्णस्य एरण्डतैलस्य नासायाम् द्विबिन्दुक्षेपणम्		
पित्तजः			
प्रतिश्यायः	सितोपलादिचूर्णम्	१—२ माषाः	घृतं—मधु
	नागपुष्पचूर्णम्	,,	घृतं+मधु

१—कण्टकारिकामूलं-गुडूची, नागरं—समानभागगृहीतानां २ कर्षस्य क्वाथः ।

प्रकारः	योगः	मात्रा	अनुपानम्
	वासादिक्वाथः (शा. सं.)	१–२ कर्षः	मधु
	पर्पटक्वाथः	,,	,,
	पंचगव्यनस्यम्		
	गोघृतनस्यम्		
कफजः			
प्रतिश्यायः	कंटकार्यादिक्वाथः		
	(शा. सं.)	१–२ कर्षः	मधु
	तालीसादिचूर्णम्	१–२ माषाः	,,
	बृहतीलवणचूर्णम	,,	,,
	त्रिकटुचूर्णम्	,,	,,
	त्रिफलाचूर्णम्	,,	,,
	षड्बिन्दुनस्यम्	—	—
	श्वासकुठाररसः	३ गुंजा	आर्द्रकस्वरसः
	रक्तचन्दनलेपः		
	कर्पूरलेपः		
	शटीलेप		
	दशांगलेपः		
सान्निपातिक–			
प्रतिश्यायः	दोषोद्रेकानुसारिणी चिकित्सा		
कृमिज –			
नासारोगः	विडंगतैलनस्यम्		
	करंजतैलनस्यम्		
	निम्बस्वरसनस्यम्		
	श्वासकुठारादि प्रधमननस्यम्		
	कृमिमुद्गररसः	१–३ गुंजा	जलम्
	कृमिकुठाररसः	,,	,,

शिरोरोगः (शिरोवेदना)

प्रकारः	योगः	मात्रा	अनुपानम्
वातजः	शिवात्रयीचूर्णम्+		
	पारसीकयवानीचूर्णम्	०।-०॥ कर्षः	जलम्
	पथ्यादिक्वाथः	१-२ ,,	मधु
	नारिकेलपाकः		
	षड्बिन्दुनस्यम्		
	नृसारबाष्पः		
	एरण्डतैलमर्दनम्		
	शिरोबस्तिधारणम्		
	वचाशुण्ठीदेवदारुलेपः		
	प्रतिमर्शनस्यं गोघृतस्य		
पैत्तिकः; रक्तजः	सर्पगन्धाचूर्णम्+मांसी	४-८ गुंजा	दुग्धशर्करा
	सुवर्णमाक्षिकभस्म	१-३ ,,	घृत+शर्करा
	प्रवालभस्म	,,	,,
	कर्पूरशिलाभस्म	,,	,,
	सुतशेखररसः	,,	आर्द्रक+मधु
	धात्रीरसायनम्	१-२ कर्षः	
	कूष्माण्डअवलेहः	,,	
कफजः			
शिरोरोगः	त्रिभुवनकीर्तिः	३-६ गुंजा	मधु
	षड्बिन्दुनस्यम्		
	कट्फलनस्यम्		
	शुण्ठी-कुष्ठ-देवदारु-लेपः गोमूत्रेण		
	हरिद्राधूमः		
सांनिपातिकः	पुराणसर्पिष्पानम्		
	षड्बिन्दुनस्यम्		

प्रकारः	योगः	मात्रा	अनुपान
	गुडशुण्ठीनस्यम्		
	पथ्यादिक्वाथः (शा. सं.)	१–२ कर्षः	मधु
	शठी+धात्री+शिवायोगः	१–२ माषाः	जलेन
	सप्तामृतलोहः	,,	समभाग मधु घृत
क्षयज शिरोरोगः	क्षीरसर्पिष्पानम्		
	क्षीरसर्पिः नस्यम्		
	जीवनीय द्रव्यस्वेदः		
	तिल दुग्धस्वेदः		
	ब्राह्मीघृतम्	१–२ कर्षः	दुग्धम्
	छागलाद्यघृतम्	१–२ ,,	,,
	सूतशेखररसः	१–३ गुंजा	आर्द्रक+मधु
	सप्तामृतलोह	१–२ माषाः	समभाग घृत मधु
कृमिजः	कृमिमुद्गररसः	१–३ गुंजा	विडंगक्वाथः
	विडंगतैलनस्यम्		
	सीताफलस्वरसनस्यम्		
सूर्यावर्तः	भल्लातकक्षीरपाकः	०॥–३ भल्लातकानि	घृतं+शर्करा
	शष्कुली(जलेबी)भक्षणम्	सूर्योदयात् प्राक्	
	पथ्यादिक्वाथः	१–२ कर्षः	मधु
	क्षीरसर्पिर्नस्यम्		
	भृंगराजस्वरसनस्यम्		
	गुडशुण्ठीनस्यम्		
	दशांगलेपः		
अर्धावभेदकः	भल्लातकक्षीरपाकः		घृतं+शर्करा
	त्रिभुवनकीर्तिरसः	१–३ गुंजा	दुग्धम्
	गुडशुण्ठीनस्यम्		
	षड्बिन्दुनस्यम्		
अनंतवातः	समीरपन्नगरसः+सर्पगंधा	३–६ गुंजा	ब्राह्मीघृतम्
शंखकः	असाध्यः		

स्त्रीरोगाः

प्रकारः	योगः	मात्रा	अनुपानम्
प्रदरः वातजः	दार्व्यादिक्वाथः	१-२ कर्षः	मधु
	कुशमूलं	०।-०।। कर्षः	तण्डुलाम्बु
	बलामूलं	१ कर्षः	छागीदुग्धम्
	कार्पासमूलार्कः	०।।-१ ,,	जलम्
	बोलपर्पटी	२-४ गुंजा	उष्णजलम् वा घृतं+मधु
	प्रदरान्तकरसः	,,	घृतं+मधु
	दशमूलारिष्टः	१-२ कर्षः	जलम्
	बलातैलम्	१ ,,	क्षीरम्
	बलातैलपिचुधारणम्		
	फलवर्ति धारणम्		
	सन्धिवातहररसः		
पैत्तिकप्रदरः	गुडूचीस्वरसः	१-२ कर्षः	मधु+शर्करा
	आमलकस्वरसः	,,	शर्करा
	रसायनचूर्णम्	०।-०।। कर्षः	तण्डुलधावनम्
	नागपुष्पचूर्णम्	,,	,,
	चन्दनादिचूर्णम्	,,	,,
	पुष्यानुगचूर्णम्	,,	,,
	चंद्रकलारसः	१-२ गुंजा	चन्दनजलेन
	प्रदरारिलोहः	,,	कुशमूलक्वाथः
	लोध्रासवः	१-२ कर्षः	जलम्
श्लैष्मिकप्रदरः	रोहितकमूलकल्कः	०।-०।। कर्षः	मधु-शर्करा
	धातकीपुष्पकल्कः	०। ,,	मधु
	कार्पासीमूलकल्कः	,,	,,
	पुष्यानुगचूर्णम्	०।-०।। कर्षः	तण्डुलोदकम्
	प्रदरारिलोहः	२-४ गुंजा	कुशमूलक्वाथः
सान्निपातिक प्रदरः	दार्व्यादिक्वाथः	१-२ कर्षः	मधु
	पुष्यानुगचूर्णम्	०।-०।। ,,	तण्डुलाम्बु

प्रकारः	योगः	मात्रा	अनुपानम्
	पारावत शकृत्	६–८ गुंजा	शर्करा
	प्रदरारिलोहः	२–४ ,,	घृतं+मधु
	बोलपर्पटी	३–६ ,,	शर्करा+मधु
	शुद्ध मृद्दारः+पाषाणभेद	२ रती+०। कर्षः	तण्डुलजलम्

योनिव्यापदः

वातजासु–उदावर्ता	दशमूलक्वाथः	१–२ कर्षः	मधु
	रास्नादिक्वाथः	,,	,,
	नारसिंहचूर्णम्	१–२ माषाः	घृतं+शर्करा
	बलातैल पिचुधारणम्	—	—
	एरण्डतैल पिचुधारणम	—	—
	भार्ग्यादिक्वाथः	१–२ कर्षः	गुड+हिंगु
	योगराजगुग्गुलुः	१ -२ माषाः	रास्नादिक्वाथः
	रजःप्रवर्तिनीवटी	६–१२ गुंजा	कुमारीआसवः
वन्ध्या	आरोग्यवर्धनीरसः	०॥–१ माषाः	दुग्धम्
	नागकेशरचूर्णम्	१॥–२ माषाः	दुग्धम्+शर्करा
	पुष्यानुगचूर्णम्	,,	,,
	कृष्णतिलक्वाथः	२–४ कर्षः	सगुडः
	पलाशपत्रम	१ नग	दुग्धेन पिष्ट्वा
	शतावरीतैलम् (पानेबस्तिकर्मणि च)	१–२ कर्षः	दुग्धेन
	नारायणतैलम् (,,)	,,	,,
	बलातैलम् (,,)	,,	,,
	फलघृतं पानार्थे	,,	,,
	रसोनकल्पः		
विप्लुता	हिंग्वष्टकम्	१–३ माषाः	घृतम+उष्णोदकम्
	रास्नादिक्वाथः	२–४ कर्षः	दुग्धेन

प्रकारः	योगः	मात्रा	अनुपानम्
	तिलतैलम्	पिचुधारणार्थम्	
	स्वेदनम्		
	उष्णवातहरद्रव्यबस्तिः		
	एरण्डतैलम्	,,	,,
परिप्लुता	वातविध्वंसरसः+		
	योगराजगुग्गुलुः	६–१२ गुंजा	घृतं+शर्करा
	कोकेन्द्रवलेपः		
	अहिफेन+कर्पूरलेपः		
	वेदनान्तकरसः	१-२ गुंजा	दुग्धेन
अन्तर्मुखी	महायोगराजगुग्गुलुः	६-१२ गुंजा	दुग्धेन
	बलातैलपिचुधारणम्		
पित्तजासु–लोहितक्षया	पंचवल्कलक्वाथः	पानबस्त्यर्थम्	
	पुष्यानुगचूर्णम्	०।–०॥ कर्षः	तण्डुलोदकम्
	नागपुष्प ,,	०।–०॥ कर्षः	तण्डुलोदकम्
	प्रवालभस्म	२-८ गुंजा	धात्रीस्वरसः वा दूर्वास्वरसः
	चन्द्रकलारसः	,,	क्षीर+शर्करा
	अशोकारिष्टः	१–२ कर्षः	जलम्
	लाक्षा+रसाञ्जनम्	१–२ माषाः	दुग्धम्
	फलघृतम्	१–२ कर्षः	दुग्धम्
प्रस्रंसिनी	दशमूल क्षीरपाकः		
	अर्जुन क्षीरपाकः		

प्रस्रंसिनीं घृताभ्यक्तां क्षीरस्विन्नां प्रवेशयेत् ।
विधाय वेसवारेण[1] ततो बन्धं समाचरेत् ॥

स्फटिकाद्रव योनिबस्तिः

कारवेल्लमूललेपः

१–शुण्ठी मरीच कृष्णाभि धान्यकाजाजिदाडिमैः ।
पिप्पलीमूलसंयुक्तैः वेसवारः स्मृतो बुधैः ॥

प्रकारः	योगः	मात्रा	अनुपानम्
वामिनी; पुत्रघ्नी	पुष्यानुगचूर्णम्	०।–०।। कर्षः	तण्डुलोदकम्
	फलघृतम्	१–२ कर्षः	दुग्धम्
	बलातैल पिचुधारणम्		
पित्तला	धात्रीरसायनम्	१–२ कर्षः	दुग्धम्
	खदिरघृतम्	,,	,,
	बनफसा शार्करः	,,	,,
	नागपुष्पचूर्णम्	०।–०।। कर्षः	,,
	प्रवाल+बंगभस्म	२–४ गुंजा	घृतं+शर्करा
	चन्दनतैल पिचुधारणम्		
कफजासु–			
अत्यानंदा	निम्बपत्रस्वरसः	१–२ कर्षः	मधु
	गोमूत्रलवण योनिबस्तिः		
	धत्तूररस प्रलेपः		
	निम्बादिचूर्णम्	०।–०।। कर्षः	जलम्
कर्णिनी	फलवर्तिधारणम्		
	गोमूत्रेण प्रक्षालनम्		
	मंजिष्ठादिक्वाथः	२–४ कर्षः	जलम्
प्राक्चरणा	स्नेहपिचुधारणम्		
अतिचरणा	पुष्यानुगचूर्णम्	१–३ माषाः	तण्डुलोदकं+मधु
	कपिकच्छुचूर्णम्	,,	दुग्धम्
	स्वर्णवसंतः	३–६ गुंजा	,,
श्लेष्मला	फलवर्ति–माजुफलवर्तिधारणम्		
	सुरामण्डपिचुधारणम्		
	गोमूत्रेण प्रक्षालनम्		
	करंजक्वाथः पाने, बस्तिकर्मणि च		
त्रिदोषजासु–			
षंढी	असाध्या		
अंडिनी	शस्त्रकर्मसाध्या		

प्रकारः	योगः	मात्रा	अनुपानम्
महायोनिः	त्रिफलागुग्गुलुः	१–२ माषाः	दुग्धम्
	महायोगराजगुग्गुलुः	,,	,,
	लोध्रासवः	१–२ कर्षः	
	नारायणचूर्णम्	१ माषः	दुग्धम्
	सौराष्ट्रीद्रवबस्तिः		
	माजुफलवर्तिः		
सूचिवत्का	शस्त्रकर्म (D. & C)		
	नारायणतैलपानम्	१–२ कर्षः	क्षीरम्
	बलातैलपिचुधारणम्		
त्रिदोषजा	पुष्यानुगचूर्णम्	१–२ कर्षः	क्षीरम्
	फलघृतम्	,,	,,

सूतिकारोगाः

प्रकारः	योगः	मात्रा	अनुपानम्
मक्कलशूलम्	यवक्षारः	०।–०॥ कर्षः	उष्णाम्बु वा घृतम्
	दशमूलक्वाथः	१–२ ,,	मधु
	पंचकोलचूर्णम्	१–२ माषाः	उष्णाम्बु
	बोलचूर्णम्	,,	जलम्
	हिंग्वष्टकचूर्णम्	,,	घृतम्
ज्वरः	देवदार्वादिक्वाथः	१–२ कर्षः	मधु
	दशमूलक्वाथः	,,	घृतम्
	ज्वरघ्नक्वाथः	,,	,,
	कुबेराक्षचूर्णम्	०।–०॥ कर्षः	जलम्
	प्रतापलंकेश्वररसः	२–४ गुंजा	मधु
अतीसार; ग्रहणी	अतीसार–ग्रहणीवत् चिकित्सा		
	लाईचूर्णम्		
वातव्याधिः	सौभाग्य शुण्ठीपाकः	१–२ कर्षः	
	महायोगराज गुग्गुलुः	१ माषः	
	बृहत्वात चिंतामणिः		दुग्धम्

प्रकारः	योगः	मात्रा	अनुपानम्
स्तन्यक्षयः	विदारीचूर्णम्	१–२ कर्षः	दुग्धम्
	शतावरीस्वरसः वा चूर्णम्	,,	,,
	नारिकेलपाकः	१–२ कर्षः	,,
स्तन्यदुष्टिः–			
वातदुष्ट स्तन्यम्	दशमूलक्वाथः	१–२ कर्षः	मधु
पित्तदुष्ट स्तन्यम्	अमृता–पटोल, शतावरी,– निंब, चंदनक्वाथः		शर्करा
कफदुष्ट स्तन्यम्	वमनम् देयम्		
	निम्बादिचूर्णम्	०।–०।। कर्षः	जलम्
सान्निपातिकम्	स्तन्यशुद्धिकरो वर्गः[१]		

बालरोगाः

कुकूणकः	चन्द्रोदयावर्तिः अंजनम्		
	धात्रीस्तन्यनिश्चोतनम्		
पारिगर्भिकः	लघुवसन्तः	१ गुंजा	मधु+घृतम्
	क्षीरपिप्पली		
	कुमारीआसवः	१/८ कर्षः	जलम्
	कुमारकल्याणरसः		
शकृद्द्रवम्	बालचातुर्भद्रचूर्णम्	१–३ गुंजा	मधु
	शुण्ठी+हरीतकी	,,	,,
तालुकंटकः	उदुम्बरदुग्धेन तालुलेपः		
	कुक्कुटाण्डस्नेहेन तालुलेपः		
	हरीतकी+वचा+कुष्ठकल्कः	१–३ गुंजा	मधु
महापद्मः	विसर्पवत् चिकित्सा		
दन्तोद्भेदः	बालचातुर्भद्रम्	१–३ गुंजा	मधु
	पाषाणभेदलेपः मधुना दन्तपाल्याम्		

१-पाठा नागर सुरतरु घना मृता सारिवेन्द्रयवमूर्वाः ।
कटुका किराततिक्तं वर्गोऽयं स्तन्य शुद्धिकरः ।।

प्रकारः	योगः	मात्राः	अनुपानम्
	रेवंचिनियोगः[1]	१–३ गुंजा	मधु
	दन्तोद्भेदगदान्तकरसः	१–३ गुंजा	मधु
मुखपाकः	गैरिकम् क्षौद्रेण लेपः		
	हरीतकी ,, ,,		
	रसांजनद्रवलेपः		
अहिपूतना	शंख+यष्टि+रसांजनलेपः		
	धातकीकुसुमलेपः		
नाभिपाकः	पंचगुणतैलपिचुः		
	पंचवल्कलचूर्णावचूर्णनम्		
कार्श्यम्	लाक्षादितैलमर्दनम्		
	सुवर्णवसंतः	१ गुंजा	क्षीरम्
	प्रवालपञ्चामृत	,,	,,
फक्कः	सुवर्णवसंतः	१–२ गुंजा	क्षीरम्
	अजास्थिभस्म+प्रवालभस्म	,,	,,
	पंचामृतपानम्		
	मत्स्यवसा पानाभ्यंगार्थम्		
बालग्रहः	पारसीकयवानीचूर्णम्	१–२ गुंजा	जलम्
	सर्पगन्धाघनः	,,	,,

१–रेवंचिनि+मुग्धरसः+शुण्ठी+स्वर्जिका

भेषज-संहितोक्तानामौषधकल्पानां पाठा :

अगस्तिहरीतकी

द्रव्याणि :—दशमूलं २० तोला, कपिकच्छू, शंखपुष्पी, कर्चूरः, बला, गजपिप्पली, चित्रकं, भारंगमूलं, पुष्करमूलं प्रत्येकं २ तोला; यवाः ६४ तोला; हरीतकी २५ तोला, जलं ३२० तोला।

विधि :—सर्वं एकत्र क्वाथयेत् यवहरीतक्योः आस्विन्नभावात्। पश्चात् क्वाथं वस्त्रपूतं कृत्वा स्विन्नाः च हरीतक्यः, १०० तोला गुडस्य, घृतं, तैलं, पिप्पलीचूर्णम् च प्रत्येकं ४ तोला प्रमाणेन गृहीत्वा......एकत्र क्वाथयेत् अवलेहस्य-सम्यक् पाकं यावत्। स्वांगशीते तस्मिन् मधुनः ४ तोला प्रक्षिपेत्। सुष्ठु स्थापयेत्।

मात्रा १–२ हरीतक्यौ यावत्, सावलेहरसम्।

प्रयोग :—रसायनार्थे, कासे, श्वासे, यक्ष्मणि, हिक्कायां, विषमज्वरे, अर्शःसु, अरुचौ पीनसे च युज्यते। बलप्रदः......वली पलित नाशको भवति।

(शार्ङ्गधर)

अग्निकुमाररसः

पारदः, गन्धकं, वत्सनाभः, टंकणं, शंखभस्म प्रत्येकं १ तोला, वराटिका-भस्म २ तोला, मरिचम् ८ तोला, निम्बुस्वरसस्य ७ भावनाः। (यो. र.)

अग्नितुण्डी वटी

शुद्धपारदः, वत्सनाभः, शुद्धगन्धकः, अजमोदा, हरीतकी, बिभीतकः, आमलकम्, सर्जक्षारः, यवक्षारः, चित्रकः, सैन्धवम्, जीरकम्, सौवर्चलम्, विडङ्गम्, शुण्ठी, मरिचम्, पिप्पली, सामुद्रलवणम् प्रत्येकं १ भागः, विषमुष्टिः १८ भागाः। जम्बीराम्लेन मर्दयेत्। मात्रा २–४ गुंजाः। (शा. सं.)

अभयादिक्वाथः

अभया, मुस्ता, धान्यकम्, रक्तचन्दनम्, पद्मकम्, वासा, इन्द्रयवः, उशीरः, गुडूची, कृतमालः, पाठा, शुण्ठी, तिक्ता, पिप्पली प्रत्येकं १ भाग। मात्रा २–४ कर्षाः। (शा. सं.)

अभयारिष्टः

पिप्पली, मरिचम्, विडङ्ग, एलवालुकम्, लोध्रः प्रत्येकं ८ भागाः इन्द्रवारुणी २० भागाः, कपित्थगर्भः ४० भागाः, हरीतकी ३२ भागाः, आमलकम् ६४ भागाः, जलम् ४०१६ भागाः।

क्वाथः कार्यः। पादावशेषम् परिस्रावयेत्।

गुडः......८०० भागाः।

घृतलिप्ते भाजने निक्षिप्य यवपल्ले पक्षम् उपेक्षेत।

मात्रा १–२ कर्ष। (सु. चि. अ. ६)

अमीररस

रसकर्पूरं, हिंगुलं, दालचिकना, रजतसूत्रं प्रत्येकं १ तोला।

अमृतप्राशः

द्रव्याणि :—क्षीरम्, धात्रीरसः, विदारीरसः, इक्षुरसः, क्षीरिवृक्षकषायः, घृतम् प्रत्येकं ६४ तोला।

कल्कद्रव्याणि :— मधुकम्, इक्षु, द्राक्षा, श्वेतचन्दनम्, रक्तचन्दनम्, उशीरम्, शर्करा, उत्पलम् पद्मकम्, मधूकम, धातकीकुसुमं, अनन्तमूलम्, काश्मरी, भूस्तृणम् प्रत्येकम् १ तोला।

विधि :—एतैः द्रव्यैः घृतं पाचयेत्, तस्मिन् शीते मधुनः १२४ तोलकान्, शर्करायाः ४०० तोलकान्, त्वकचूर्णम्, एलाचूर्णम्, तमालचूर्णम्, नागकेसरम प्रत्येकं २ तोला प्रक्षिपेत।

सर्वम् आलोड्य खादेत। क्षीरमांसाशी स्यात्।

मात्रा १–२ तोला यावत्।

प्रयोग :—रक्तपित्तं, क्षतक्षयं, उरःक्षतं, तृष्णां, श्वासं, हिक्कां छर्दिं, मूत्रकृच्छ्रं नाशयति; बल्यं, स्त्रीरतिवर्धनम् च।

अमृतारिष्टः

अमृता ४०० भागाः, दशमूलक्वाथः ४०० भागाः, जलम् ४०९६ भागाः।

क्वाथः कार्यः। चतुर्थांशम् अवशेषयेत॥

प्रक्षेपद्रव्याणि :—गुडः १२०० भागाः, कृष्णश्वेतजीरकम् ६४ भागाः, पर्पटकः ८ भागाः, सप्तपर्णः, शुण्ठी, मरीचम्, पिप्पली, मुस्ता, नागकेशरम्, मत्स्या, अतिविषा, इन्द्रयवः प्रत्येकम् ४ भागाः। विधिवत् साधयेत्।

मात्रा १–२ कर्षः। (भा. भै. र.)

अरविन्दासवः

अरविन्दम्, उशीरम्, काश्मरी, नीलमुत्पलम्, मंजिष्ठा, एला, बला, मांसी, मुस्ता, सारिवा, शिवा, बिभीतकं, वचा, आमलकम्, शठी, श्यामा,

नीलिनी, पटोलः, पर्पटः, अर्जुनः, मधूकः, मधुकम् , मुरामांसी प्रत्येकं १ भागः, द्राक्षा २० भागाः, धातकी १६ भागाः, जलम् २०४८ भागाः, शर्करा १०० भागाः, मधु ५० भागाः । मासं मृदभाण्डे स्थापयेत् । मात्रा ०।।–१ कर्षः

अर्कलवणः

अर्कपत्रं, सैन्धवम् प्रत्येकम् १ भाग. ।

मृत्पात्रे निधाय पुटम् दद्यात् । मात्रा ०। कर्षः ।

अर्जुनारिष्टः (पार्थाद्यरिष्टः)

अर्जुनत्वक् ४०० भागाः, द्राक्षा २०० भागाः, मधूकपुष्पम् ८० भागाः, जलम् ४०९६ भागाः ।

क्वाथः कार्यः । चतुर्थांशम् अवशेषयेत् ।

प्रक्षेपद्रव्याणि :— धातकीपुष्पम् ८० भागाः, गुडः ४०० भागाः ।

घृतलिप्ते भाण्डे मासमेकम् स्थापयेत् । मात्रा १–२ कर्षः । (भै. र.)

अर्शोघ्नी वटी

निम्बफलमज्जा २ भागौ, महानिम्बफलमज्जा (बकायन) २ भागौ, खूनखराबा (दमउलअखवेन) २ भागौ, तृणकान्तपिष्टि (कहेरबा) ११ भागाः, रसांजनं ६ भागाः ।

गुलाबजलेन चन्दनार्केण वा मर्दयेत् । वल्लमात्रा गुटिका कार्या । मात्रा २–४ वल्लः । (सि. यो. सं.)

अविपत्तिकरचूर्णम्

शुण्ठी, मरिचम् , पिप्पली, हरीतकी, बिभीतकम, आमलकम् , मुस्ता, बिड्लवणम् , विडंगम, एला, पत्रम् प्रत्येकं १ भागः, लवङ्गकुसुमम् ११ भागाः, त्रिवृत् २२ भागाः, शर्करा ४४ भागाः ।

मात्रा ०।।–१ कर्षः । (भै. र.)

अश्वकंचुकीरसः

पारदः, गन्धकं, वत्सनाभः, टंकणम् , हरितालम् , शुण्ठी, मरिचम् , मागधी, हरीतकी, बिभीतकं, आमलकं प्रत्येकं १ तोला, जयपालः ११ तोला, भृंगराजस्वरसस्य २१ भावनाः । (र. री. सु.)

अश्वगंधादिघृतम्

द्रव्याणि :— अश्वगंधा, विदारी, शतावरी, गोक्षुरः, आमलकी, यष्टिमधु, पुनर्नवा, उशीरः, तृणपंचमूलम् , एरण्डमूलम् , निम्बुकरसः, घृतम प्रत्येकं २४ भागाः ।

विधि :– घृतम् यथाविधि पाचयेत्। मात्रा १–४ कर्षाः दुग्धेन।

प्रयोग :– कार्श्ये, बालशोषे, हृद्रोगे, शुक्रक्षये। (भै. र.)

द्वितीयः पाठः

अश्वगंधाकल्कः ३२ तोला, गोदुग्धम् ४ प्रस्थाः, गोघृतम् २ प्रस्थौ, जलम् ८ प्रस्थाः।

विधि :—यथाविधि......पाच्यम्।

प्रयोग :— बालानां कार्श्ये। मात्रा २–३ बिन्दवः पानार्थम्।

अश्वगंधारिष्टः

अश्वगंधा २०० भागाः, मुषली ८० भागाः; मंजिष्ठा, हरीतकी, हरिद्रा, दारुहरिद्रा, मधुयष्टी, रास्ना, विदारी, अर्जुनः, मुस्ता, त्रिवृत प्रत्येकं ४० भागाः; अनन्ता, श्यामा, चन्दनम्, रक्तचन्दनम्, वचा, चित्रकः प्रत्येकम् ३२ भागाः, जलम् ८१९२ भागाः। क्वाथः कार्यः। अष्टमांशम् अवशेषयेत्। पूते शीते प्रक्षपद्रव्याणि प्रदापयेत्।

प्रक्षेपद्रव्याणि :—धातकीपुष्पम् ६४ भागाः, मधु १२०० भागाः, त्रिकटुचूर्णम् ८ भागाः, त्रिजातचूर्णम् १६ भागाः, प्रियंगुः १६ भागाः, नागकेशरम् ८ भागा।

मात्रा १–२ कर्षः। (भै. र.)

अष्टमूर्तिः

शु–पारदः, शु–गन्धकं, शु–हिंगुलं, शु–मनःशिला, शु–मल्लः प्रत्येकं १ तोला, शु–तालः ६ माषाः, शु–रसकर्पूरम् ६ तोला, शु–मृद्दारशृंगः ६ माषाः, स्फटिका-पुष्पं १ तोला, स्वर्णपत्रम् ६ माषाः, रजतपत्रम् ६ माषाः।

वालुकायंत्रे क्रमात् पचेत। मात्रा १–२ गुंजा। अनुपानम् आर्द्रकस्वरसः मधु।

(र. यो. सा.)

अस्थिसंधानकलेपः

ऐलेयम्, हीराबोलं, गुग्गुलुः, रेवंदचीनी, लोध्रम्, सौराष्ट्री, मेदालकडी, आम्रहरिद्रा, स्वर्जिकाक्षारः, मायुफलम् प्रत्येकं १ भाग।

आनन्दभैरवरसः

हिंगुलं, वत्सनाभं, शुण्ठी, मरीचं, मागधी, सौभाग्यं, गन्धकं प्रत्येकम् ५ तोला। जम्बीरस्वरसस्य १ भावना। (भै. र.)

आमराक्षसी

हिंगुलम् , अहिफेनम् , कर्पूरम , जातिफलम् , लवंगम् प्रत्येकम् १ भागः । जलेन मर्दयेत् विजयारसेन वा । मात्रा १–२ गुंजा ।

(वैद्यक चिकित्सासार पूर्वार्द्ध)

आरोग्यवर्धनीरसः

शुद्धपारदः, शुद्धगंधकः, लोहभस्म, अभ्रकभस्म, ताम्रभस्म प्रत्येकम् १ भागः, अभया, बिभीतकः, आमलकम् (त्रिफला) प्रत्येकम् २ भागौ, शिलाजतु ३ भागाः, शुद्धगुग्गुलुः ४ भागाः, चित्रकमूलत्वक् ४ भागाः, कटुरोहिणी २२ भागाः ।

निम्बपत्ररसेन मर्दयेत् । मात्रा ३–६ गुंजा । (सि. यो. सं.)

आर्द्रकावलेहः

द्रव्याणि :—आर्द्रकम २०० तोला, गुडः २०० तोला, जलम् ८०० तोला ।

प्रक्षेपकल्कद्रव्याणि :—धान्यकम् , मुस्ता, अजमोदा, अगरम् , जीरकम् , त्वक्, तमालम , एला, बालकं प्रत्येकं ४ तोला ।

विधि :—आर्द्रकं खण्डशः कृत्वा जले क्वाथयेत् ; चतुर्थांशशेषे क्वाथे तस्मिन् गुडं दत्त्वा लेहवत् साधयेत् । सुशीते तस्मिन् कल्कं क्षिपेत् ।

प्रयोग :—कास, अर्शो, ज्वर, पीनस, श्वथथु, गुल्म, क्षयहारी ।

मात्रा १ तोला । (यो. र.) (वै. जी.)

इच्छाभेदीरसः

पारदं, गंधकं, सौभाग्यं, शुण्ठी, मरीचं, प्रत्येकम् १ भागः, शुद्धजयपालः ३ भागाः । निम्बुस्वरसस्य १ भावना । (भै. र.)

इरिमेदादि-तैलम्

द्रव्याणि :—इ(अ)रिमेदत्वक्, ४०० तोला, जलम् १०२४ तोला, तैलम् १२८ तोला ।

कल्कद्रव्याणि :—इरिमेदत्वक्, लवङ्गम् , गैरिकम् , अगुरु, पद्मकाष्ठम् , मुस्ता, त्वक् , जातीफलम् , कर्पूरम्, एला, मंजिष्टा, लोध्रम , मधुकम् , लाक्षा, न्यग्रोधत्वक्, कंकोलम् , खदिरत्वक्, पतंगम , धातकीकुसुमम् , नागकेशरम , कट्फलम् ।

विधि :— प्रथमम् अरिमेदत्वचः चतुर्थांश क्वाथम् कृत्वा, वस्त्रपूतम् क्वाथम्, कल्कद्रव्याणाम् कल्कं, तैलं च ऐकध्यं, मृदुवह्निना पाचयेत्।

प्रयोग :—प्रदुष्टमांसं-मुखपाकं, चलितं शीर्णदन्तं, सौशिरम्, शीतादं, दन्तहर्षं, क्रिमिदन्तकम्, जिह्वा-तालु–ओष्ठादिपाकं नाशयति, व्रणानां शोधनं रोपणं च करोति।

मात्रा–गंडूषधारणार्थं १॥ तोला।

लेपनार्थं व्रणे वर्तिदानार्थं च उपयुज्यते। (यो. र.) (भा. प्र.)

उन्मादगजकेशरी

शुद्धसूतं वचाक्वाथैस्त्रिदिनं मर्दयेत्। शंखपुष्पीरसैः तद्वत् गन्धकं मर्दितं क्षिपेत्। गोमूत्रमर्दितं गोलं कृत्वा मूषायां निरोधयेत्, तत्पश्चात् पुटं दद्यात्।

पारदः ५ तोला, गन्धकं ५ तोला।

मात्रा–४ वाल, समसर्षपचूर्णकम्।

अथवा

पारदः, गन्धकं, मन शिला, कनकबीजं प्रत्येकं ५ तोला, वचायाः ७ भावना, ब्राह्मयाः ७ भावनाः।

मात्रा १ गुंजा घृतेन।

उशीरासवः

उशीरम्, बालकम्, श्वेतपद्मम्, काश्मरी, नीलोत्पलम्, प्रियंगुः, पद्मकाष्ठं, लोध्रः, मंजिष्ठा, धन्वयासकम्, पाठा, किराततिक्तम्, वटत्वक्, उदुम्बरत्वक्, शठी, पर्पटः, पटोलः, काञ्चनारः, जम्बूत्वक्, शाल्मलीनिर्यासः प्रत्येकं ४ भागाः, द्राक्षा ८० भागाः, धातकी ६४ भागाः, जलम् २०४८ भागाः, शर्करा ४०० भागाः, मधु २०० भागाः। विधिवत् साधयेत्। मात्रा १–२ कर्षः।

एकांगवीररसः

गन्धकं, रससिन्दूरं, कान्तलोहभस्म, वंगभस्म, नागभस्म, ताम्रभस्म, अभ्रकभस्म, तीक्ष्णलोहभस्म, शुण्ठी, मरीचं, मागधी प्रत्येकं १ भागः।

त्रिफला, त्रिकटु, निर्गुण्डी, चित्रकं, आर्द्रकं, शि, कुष्ठं, आमलकं, विषतिन्दुकं, अर्कः, कनकपत्रम् प्रत्येकं ३ भावनाः।

एलादिगुटिका

एला, पत्रम्, त्वक् प्रत्येकं १ भागः, पिप्पली ४ भागाः, शर्करा, मधुयष्टी, खर्जूरं, द्राक्षा प्रत्येकं ८ भागाः। मधुना गुटिका कार्या। मात्रा १–८ गुटिकाः।

(चरक चि. अ. ११)

एलादिघृतम् (रसायनम्)

द्रव्याणि :—सूक्ष्मैला, अजमोदा, हरीतकी, बिभीतकं, आमलकं, मरीचं, शुण्ठी, सुराष्ट्रजा, पिप्पली, चित्रकमूलं, खदिरसारः, विजयसारः निम्बत्वक्, सालसारः, भल्लातकं, विडङ्गम्, वचा, नागरमुस्ता प्रत्येकम् १६ तोला।

विधि :—सर्वम् कुट्टयित्वा...अष्टगुणे अंभसि चतुर्थांश शेषं क्वाथयित्वा, वस्त्रपूतं क्वाथं गृहीत्वा, वंगोपलिप्ते कटाहे क्वाथं १२८ तोलकप्रमाणं घृतं च सिद्धम् कृत्वा तस्मिन्–

वंशरोचना २४ तोला, शर्कराचूर्ण १२० तोला, एलाचूर्ण ४ तोला, त्वक्चूर्ण ४ तोला, तमालपत्रम् ४ तोला, मधु २५६ तोला संमेल्य खजेन एकरसं कृत्वा सुष्ठु रक्षयेत् घृतलिप्ते भाण्डे।

प्रयोग :—क्षये–क्षतजकासे, क्षयजकासे, उरःक्षते, बालशोषे, राजयक्ष्मणि, कार्श्ये, मांसक्षये च। मात्रा १–२ तोला दुग्धेन सह। (सुश्रुत)

कट्फलादिचूर्णम्

कट्फलम्, मुस्ता, तिक्ता, शुण्ठी, शृंगी, पुष्करमूलम् प्रत्येकं १ भागः।

मात्रा–०। कर्षः। (शा. सं.)

कनकारिष्टः

आमलकम् ४०० भागाः, पिप्पली, मरिचम्, विडंगः प्रत्येकं १६ भागाः, पाठा, पिप्पलीमूलम्; क्रमुकः, चव्यम, चित्रकः, मंजिष्टा, एलवालुकम्, लोध्रः प्रत्येकं ४ भागाः, कुष्टम्, दारुहरिद्रा, देवदारु, अनन्ता, श्यामा, इन्द्रवारुणी, भद्रमुस्तम प्रत्येकं २ भागौ, नागपुष्पम् १६ भागाः, जलम् ८१९२ भागाः।

क्वाथः कार्यः। पादावशेषे पूते च शीते तस्मिन् प्रदापयेत–

द्राक्षाक्वाथः ५१२ भागाः, शर्करा ८०० भागाः, मधु ३२ भागाः, त्वक् १ भागः, एला १ भागः।

तत् सर्वम् सुचोक्षे घृतलिप्ते अगुरुधूपिते पात्रे पक्षम् स्थापयेत्।

मात्रा १–२ कर्षः। (चरक चि. अ. १४)

कन्यालोहादि गुटिका

ऐलेयकः, कासीसम, त्वक्, एला शुण्ठी, गुलकन्द।

वल्लमात्रा गुटिका कार्या। मात्रा — ३–६ वल्लः।

कफकेतुरसः

शंखभस्म, शुण्ठी, मरीचं, पिप्पली, सौभाग्यं प्रत्येकं १ तोला, वत्सनाभः ५ तोला। आर्द्रकस्वरस भावनाः ३।

करवीरतैलम्

द्रव्याणि :— करवीरपत्रम्, निशा, दन्तीमूलं, लाङ्गलीमूलं, सैन्धवं, चित्रकं, मातुलुङ्गम्, अर्कदुग्धं प्रत्येकं १ तोला, जलं १२८ तोला, तैलम् ३२ तोला।

विधि :— द्रव्याणां कल्कं विधाय तैलं पाचयेत्।

प्रयोग :—अभ्यंगार्थं, वर्तिदाने च। भगंदरे, उपदंशे, कुष्ठे च शोधनं रोपणं च भवति। (यो. र.)

कर्णानंदतैलम्

तिलतैलम् २० शेर, अपामार्गस्वरसः १० शेर, निम्बपत्रकल्कः ४ शेर, दारुहरिद्रा, दशमूलक्वाथः, यष्टिमधु, शतपुष्पा, शिग्रुत्वक्, रसवन्ती, कुष्ठं, वचा, देवदारु प्रत्येकं २० तोला। तैलविधिना पाचयेत्।

कर्पूररसः

कर्पूरं, हिंगुलं, अहिफेनं, मुस्ता, शक्रयवः, जातिफलम् प्रत्येकम् १ भागः। आर्द्रकरस-भावना।

कर्पूरासवः

मद्यम् १०० भागाः, कर्पूरम् ८ भागाः, एला, मुस्ता, शुण्ठी, अजमोदा, विडंगः प्रत्येकम् १ भागः।

काचभाण्डे मासमेकम् निधाय वस्त्रपूतम् प्रयोजयेत्।

मात्रा—१०–२० बिन्दवः। (भै. र.)

कल्पतरुरसः

पारदं, गन्धकं, वत्सनाभः, मनःशिला, रौप्यमाक्षिकं, सौभाग्यं, शुण्ठी, प्रत्येकम् १ तोला, मरिचं १० तोला, पिप्पली २ तोला। (भावप्रकाश)

कल्याणवटकाः

द्राक्षा ५ तोला, हरीतकी ५ तोला। आमलक प्रमाणान् वटकान् कारयेत्।

मात्रा—१–२ वटकाः। अनुपानम् जलम्।

कस्तूरीभैरवः

शुद्ध हिंगुलं, शुद्ध वत्सनाभं, सौभाग्यं, जातिफलं, जातिपत्री, मरीचं, कस्तूरी, कर्पूरं प्रत्येकं १ तोला, ताम्बूलरसस्य १ भावना।

मात्रा १–२ गुंजा। ताम्बूलरसेन।

कंटकारीलवणः

कंटकारीपंचांगं १ भागः, सैन्धवम १ भागः। मृत्पात्रे निधाय पुटं दद्यात्।

मात्रा – १/४ कर्षः।

कंटकार्यवलेहः

द्रव्याणि :—कंटकारीपंचांगं ४०० तोला, जलं १०२४ तोला।

१/४ क्वाथं कृत्वा वस्त्रपूतं कारयेत्। तस्मिन् गुडूचीचूर्णं, चव्यं, चित्रकं, मुस्ता, कर्कटशृंगी, त्र्यूषणं, धन्वयासः, भार्ङ्गी, रास्ना, शठी प्रत्येकं ४ तोला, शर्करा ४० तोला, घृतं ३२ तोला, तैलं ३२ तोला क्षिप्त्वा लेहवत् पक्त्वा शीते तस्मिन् मधु ३२ तोला, तुगाक्षीरी १६ तोला, पिप्पली १६ तोला प्रक्षिप्य मृद्भाजने निदध्यात्।

प्रयोग :—कासं, हिक्कां, पार्श्वशूलं, श्वासं च हरति।

मात्रा—१–२ तोला यावत्।

काञ्चनारगुग्गुलुः

काञ्चनारत्वक् ४० भागाः, त्रिफलाचूर्णं २४ भागाः, त्रिकटुचूर्णं १२ भागाः, वरुणत्वक् ४ भागाः, एला, त्वक्, पत्रकं प्रत्येकं १ भागः, शुद्ध गुग्गुलुः ८३ भागाः घृतेन पिण्डीकृत्य शाणमात्रा गुटिका कार्या। घृतपात्रे धारयेत्।

मात्रा—२–६ गुटिकाः। (शा. सं.)

कामदुघारसः

मुक्तापिष्टिः, प्रवालपिष्टिः, शुक्तिभस्म, कपर्दिकाभस्म, शंखभस्म, सुवर्णगैरिकं, अमृतासत्वं प्रत्येकं २ तोला। मात्रा—१–३ गुंजा।

जीरक शर्कराभ्यां वा आमलकघृताभ्याम्। (र. यो. सा.)

कालकचूर्णम्

गृहधूमं, ताक्ष्यं, पाठा, शुण्ठी, मरिचं, पिप्पली, यवक्षारम् , चित्रकं, अगुरु, हरीतकी, बिभीतकः, आमलकः, तेजोह्वा प्रत्येकं १ भागः।

मुखदन्तगलविकारे सक्षौद्रं मुखेन धारयेत्। (चरक चि. २६)

कासीसादितैलम्

कासीसं, सैन्धवं, कृष्णा, शुण्ठी, कुष्ठं, लाङ्गली, स्वर्णक्षीरी, शिलाभिद्, अश्वमारः, दन्ती, विडंगं, चित्रकं, तालकं, मनःशिला, एषां कल्कः, अर्कपत्रं, स्नुहीपयः प्रत्येकं ३ तोला।

विधि:—तिलतैलं...१६० तोला गोमूत्रं...६४० तोला सर्वम्...एकत्र कृत्वा तैलं पाचयेत्।

प्रयोग:—अभ्यंगार्थं एव युज्यते अर्शसां, व्रणानां, नाडीव्रणानां च क्षार-कर्मकरम। अर्शांसि शातयति। (शार्ङ्गधरः, भै. र.)

कुटजघनवटी

कुटजत्वक् १०० भागाः, जलं १६०० भागाः।

क्वाथः अष्टमांश शेषः; घनक्रिया।

प्रक्षेपद्रव्यम् :— अतिविषा......वटीनिर्माणे यथावश्यकम्। चणकप्रमाणा वटी कार्या। मात्रा—४–८ वटिकाः। (सि. सं.)

कुटजादिवटी

कुटजत्वक्, मायुफलं, लवंगम , कर्कटशृंगी, बिभीतकमज्जा, विडंगं, बिल्वफलमज्जा, जातिफलं, शुण्ठी, मरिचं, जातिपत्री, नागकेशरम् प्रत्येकं १ भागः। गुंजाभा गुटिका कार्या। मात्रा—२–४ वट्यः। (वै. चि.)

कुटजारिष्टः

कुटजमूलम् ४०० भागाः, द्राक्षा २०० भागाः, मधूकपुष्पं ४० भागाः, काश्मरी ४० भागाः, जलम् ४०९६ भागाः। क्वाथः, चतुर्थांश शेषः। धातकी-पुष्पम् ८० भागाः, गुडः ४०० भागाः।

विधिवत् साधयेत्। मात्रा १–२ कर्षः। (शा. सं.)

कुटजावलेहः

कुटजत्वक्चूर्णम् ४०० तोला, जलं १६०० तोला।

पादशेषः क्वाथः कार्यः......तस्मिन्......गुडं २०० तोला प्रक्षिप्य अवलेहः कार्य......शीते तस्मिन्—

रसवंती, मोचरसः, शुण्ठी, पिप्पली, मरिचं, बालकं हरीतकी, बिभीतकं, आमलकं, लज्जालुः, चित्रकमूलं, अतिविषा, पाठामूलं, बिल्वफलं, वचा, इन्द्रयवः, भल्लातकं, विडंगं प्रत्येकं ४ तोला।

इत्येषां चूर्णं...प्रक्षिपेत्। मधु च तोला ३२ प्रक्षिपेत्।

प्रयोग :—अर्शःसु, अतिसारे, अरुचौ, ग्रहण्यां, आमातिसारे, पाण्डुरोग–रक्तपित्ताम्लपित्तेषु, कार्श्ये, शोथे, सुधातत्त्वक्षये च।

मात्रा—०॥–१ तोला दिने द्विःकृत्वः। अनुपानं तक्रं दुग्धं, जलं घृतं वा। (नि. र.)

कुमारकल्याणरसः

रससिंदूरं, मुक्ताभस्म, सुवर्णभस्म, अभ्रकभस्म, लोहभस्म, सुवर्णमाक्षिकभस्म प्रत्येकं १ भागः।

कुमारीस्वरसस्यः भावना १। (भै. र.)

कुमार्यासवः

कुमारीरसः १०२४ भागाः गुडः ४०० भागाः, हरीतकीक्वाथः २५६ भागाः, (हरीतकी १०० भागाः, जलम् १०२४ भागाः), मधु २५६ भागा, धातकीपुष्पं ६४ भागाः, जातिफलं, लवंगं, कंकोलं, जटामांसी, चव्यं, चित्रकः, जातिपत्रं, कर्कटशृंगी, बिभीतकं, पुष्करमूलं प्रत्येकं ४ भागाः, लोहभस्म २ भागौ, ताम्रभस्म २ भागौ।

विधिवत् साधयेत्। मात्रा १–२ कर्षः। यो र.)

कूष्मांडावलेहः

एकं पक्वं कूष्मांडं गृहीत्वा तस्य गर्भं, कुट्टितं निष्पीडितं आतपे शोषयेत्। तस्य चूर्ण–तोला ५ घृतेन भृष्ट्वा स्थापयेत्। तस्यैव गर्भपीडनात् लब्धेन कूष्मांड-रसेन, ८० तोला शर्कराचूर्णं संमेल्य–अवलेहपाकं कृत्वा पूर्वं भृष्टं कूष्मांडचूर्णं दापयेत्। गुडपाकसमं ज्ञात्वा तस्मिन् निम्नानां प्रक्षेपः कार्यः—

त्वकचूर्णं, तमालपत्रं, एला, नागकेसरं, वंशरोचना, पिप्पली, लवंगं, जातीफलं, जातीपत्रं, कमलबीजं, धान्यकं, शुण्ठी प्रत्येकं १। तोला, मधु २० तोला।

प्रयोग :—रक्तपित्तं, दाहं, भ्रमं, अम्लपित्तं, शोषं, यक्ष्माणं, जीर्णज्वरं, कासं, गलरोगान् च नाशयेत्।

मात्रा—१–२ तोला, दुग्धेन। (भै. र.)

कृमिकुठाररसः

कर्पूरं ८ तोला, शक्रयवः, त्रायमाणं, अजमोदा, विडंग; शुद्ध हिंगुलं, वत्सनाभं, केशरं प्रत्येकं १ तोला, पलाशबीजचूर्णं १५ तोला ।

भृंगराजस्वरसस्य १ भावना, आखुकर्णीरसस्य १ भावना, ब्राह्मीरसस्य १ भावना ।

(र. रा. सु)

कृमिमुद्गररसः

पारदः १ तोला, गंधकं २ तोला, अजमोदा ३ तोला, विडंगं ४ तोला, विषतिन्दुकं ५ तोला, पलाशबीजं ६ तोला ।

(र. रा. सु.)

केशरादिवटी

कुंकुमं, रसकर्पूरं, शर्करा, श्वेतचन्दनं, लवंगं, जातिपत्री प्रत्येकं १ भागः ।

गुंजाप्रमाणा गुटिका कार्या । मात्रा—१ २ गुटी (र. यो. सा.)

कैशोरगुग्गुलुः

त्रिफलाचूर्णं १९२ भागाः, गुडूची ६४ भागाः, जलं २०४८ भागाः ।

क्वाथः कार्यः अर्धांश शेषः । वस्त्रपूते क्वाथे गुग्गुलुं पचेत् । अयःपात्रे दर्व्या संघर्षयेत् । शुद्ध गुग्गुलुः ६४ भागाः ।

प्रक्षेप द्रव्याणि :—त्रिफलाचूर्णं ६ भागाः, त्रिकटुः ६ भागाः, विडंगं २ भागौ, दन्ती १ भागः, त्रिवृत् १ भागः, गुडूची ८ भागाः ।

घृते पिण्डीकृत्य घृतपात्रे विनिक्षिपेत् । शाणमात्रा गुटिका कार्या ।

मात्रा—२–८ गुटिकाः । (शा. सं.)

कोषातक्यादितैल

तिलतैलं २ प्रस्थौ, कल्कार्थ—तिक्तकोशातकी बीजानि ११ तोला, कटुतुम्बीबीजानि ११ तोला, शुण्ठी ११ तोला, जलं ८ प्रस्थाः ।

विधि :—सर्वं एकत्र्यं कृत्वा तैलं विपाचयेत् गालयेत् च ।

प्रयोग :—अभ्यंगात् वर्त्यादि दानाच्च दुष्टं व्रणं नाशयति ।

(भै. र. आर्यभिषक्)

क्रव्यादरसः

गंधकं ८ तोला, पारद ४ तोला, ताम्रभस्म २ तोला, लोहभस्म २ तोला।

पर्पटीं कृत्वा ४०० तोलके निम्बुस्वरसे पाचनम्।

पंचकोल, जम्बीर, अम्लवेतस एषां १०० पलमितेन रसेन भावना।

सौभाग्यं सर्वतुल्यं, बिड्लवणं सौभाग्यार्धं, मरिचं, बिड्लवणार्धं। सर्वम् एकीकृत्य चणकाम्लस्य सप्त भावनाः। (र. रा. सु.)

खदिरघृतम् (महत्)

खदिरत्वक्चूर्णं ५ तोला, शिंषपाचूर्णं १ तोला, असनचूर्णं १ तोला, करंजत्वक्, अरिष्टत्वक्, वेतसं, पर्पटं, कुटजः, आटरुषकः, विडंगं प्रत्येकं १२॥ तोला, हरिद्रे द्वे २५ तोला, कृतमालकं १२॥ तोला, गुडूची १२॥ तोला, त्रिफला ७॥ तोला, त्रिवृत् १२॥ तोला, सप्तपर्णं १२॥ तोला।

सर्वम् संक्षुण्णं दशद्रोणे (१०२४० तोला) वारिणि क्वाथयित्वा १/८ शेषं वस्त्रपूतं कृत्वा धात्रीरसं तुल्यांशं सर्पिशश्च आढकं दत्वा पचेत् निम्नोक्तानां कल्कानावाप्य पलसंमितान्–

सप्तच्छद, प्रतिविषा, शम्याक, कटुरोहिणी, पाठा, मुस्ता. उशीर, त्रिफला, पटोल, पिचुमन्द, पर्पट, धन्वयवास, चन्दन, पिप्पली, पद्मकाष्ठ, हरिद्रा, दारुहरिद्रा, वचा, इन्द्रवारुणी, शतावरी, सारिवा, कृष्णसारिवा, इन्द्रयवः, वासा, मूर्वा, अमृता, किराततिक्त।

मात्रा १–४ तोला यावत्। पानाभ्यंगात् कुष्ठं हन्ति। (यो. र.)

खदिरादिगुटिका

खदिर ३२ भागाः; कमलं, कर्कटशृंगी, कट्फलं, मधुयष्टी, हरीतकी, लवंगं, शुण्ठी, मरिचं, पिप्पली, अतिविषा, कारवी, यासं, अमृता, बृहती कण्टकारिका, बिभीतक प्रत्येकं २ तोला।

दाडिमत्वक्रसैः बब्बूलत्वक्दलरसै वासारसैः च बहुशः भावयेत्।

गुंजामात्रा गुटिका कार्या। (यो. र.)

खदिरारिष्टः

खदिरत्वक् २०० भागाः, देवदारु २०० भागाः बाकुची ४८ भागाः, दार्वी ८० भागाः, त्रिफला ८० भागाः, जलं ८१९२ भागाः।

क्वाथः अष्टमांश शेषः।

प्रक्षेपद्रव्याणि :—मधु ८०० भागाः, शर्करा ४०० भागाः, धातकीपुष्पं ८० भागाः, कंकोलं, नागकेशरं, जातीफलं, लवंगं, एला, त्वक्, तमालपत्रं प्रत्येकं ४ भागाः, पिप्पली १६ भागा ।

विधिवत् साधयेत् । मात्रा १–२ कर्षः । (भै. र.)

गर्भपालरसः

शुद्ध हिंगुलं, नागभस्म, बंगभस्म, त्वक्, तेजबलं, एला, शुण्ठी, मरिचं, कणा, धान्यकं, कृष्णजीरकं, चव्यं, द्राक्षा, देवदारु प्रत्येकं १ तोला, लोहभस्म २ तोला ।

विष्णुक्रान्तायाः सप्त भावना । (र. चं.)

गण्डमालाकण्डनरसः

पारदः, १ तोला, गंधकं २ तोला, ताम्रभस्म, ३ तोला, मण्डूरभस्म ३ तोला, शुण्ठी २ तोला, मरिचं, २ तोला, मागधी २ तोला, सैन्धवं ०॥ तोला, काञ्चनारत्वक् १५ तोला, शुद्ध गुग्गुलुः १५ तोला ।

गोघृते वटिकां कारयेत् । (यो. र.)

गंधकरसायनम्

शुद्ध गंधकं ४० तोला, गोदुग्धस्य ३ भावना, त्वक्, तमालपत्रं, नागकेशरं, एला, गुडूची, पथ्या, अक्षं, धात्री, शुण्ठी, भृंगराजः आर्द्रकं प्रत्येकं ८ भावनाः ।

सिद्धे तुल्यभागा सिता । (यो. र.)

गृहधूमादितैलम्

गृहधूमः, कणा, देवदारु, अपामार्गक्षारः, करंजबीजं, अपामार्गबीजानि प्रत्येकं १ तोला तिलतैलं २४ तोला, जलं ९६ तोला ।

यथाविधि पाचयेत् । पीनसे नासार्शसां च नस्यार्थे हितम् ।

ग्रहणी कपाटरसः

पारदः, २ तोला, गंधकं १० तोला, वत्सनाभं १ तोला, अहिफेनं ४ तोला, कपर्दिका ७ तोला, मरिचं, ८ तोला, कनकबीजं २० तोला ।

केचन पोसडोडायाः भावनात्रयं व्याख्यानयन्ति ॥

(र. रा सु.) (र. चं.) (र. का.)

ग्रहणीगजकेसरीरसः

शु–गन्धकं, शु–पारदः, अभ्रकभस्म, जातिफलं, लोहभस्म, बिल्वं, मोचरसः, वत्सनाभः, अतिविषा, शुण्ठी, मरिचं, पिप्पली, धातकीपुष्पं, विजया, हरीतकी, कपित्थं, मुस्ता, अजमोदा, चित्रकं, दाडिमं, टंकणं, शक्रयवः, कनकबीजं, सर्जरसः प्रत्येकं १ तोला, अहिफेनं ०। तोला । कनकस्वरसस्य भावना ।

मात्रा–२ गुंजा । अनुपानं–जातिफलजलम् । (यो. र.)

गोक्षुरादिगुग्गुलुः

गोक्षुरः ११२ भागाः, जलम् ६७२ भागाः ।

क्वाथः कार्यः । अर्धांश शेषः । वस्त्रपूते क्वाथे गुग्गुलुम् पचेत् । गुग्गुलुः २८ भागाः ।

प्रक्षेपद्रव्याणि— त्रिकटु ३ भागाः, त्रिफला ३ भागाः, मुस्ता १ भागः ।

घृतेन पिण्डीकृत्य गुटिका कार्या । मात्रा —४–८ गुटिकाः । (शा. सं.)

गोजिह्वादिक्वाथः

गावजबान, मुलेठी, सौंफ, मुनक्का, अंजीर, उन्नाब, वासा, जूफा, सपिस्तान, खूबकलां, हंसराज, गुलबनफशा, अलसी, खतमीकी जड़, कंटकारी प्रत्येक १ तोला, मरिच ०।। तोला । मात्रा —१ तोला । (सि. यो. सं.)

चन्दनादिचूर्णम्

चन्दनं, शाल्मलीपुष्पं, त्वक्, एला, पत्रं, हरिद्रा, दारुहरिद्रा, अनन्ता, सारिवा, मुस्ता, उशीरम्, यष्टिमधु, आमलकं, मुशली, वंशलोचनं, भार्गी, देवदारु, हरीतकी प्रत्येकं १ भागः, लोहभस्म ३६ भागाः । मात्रा—४–८ गुंजाः । (भै. र. प्रमेहाधिकारः)

चंदनादितैलम्

चन्दनं, मुस्ता, नखं, दारुहरिद्रा, यष्टिमधु, शिलापुष्पं, पद्मकं, मंजिष्ठा, सरलनिर्यासः, देवदारु, शुण्ठी, एला, जातिः, नागकेसरम्, तमालपत्रं, बिल्वमज्जा, उशीरम्, कंकोलं, चन्दनं, बालकं, हरिद्रा, सारिवा, तिक्ता, लवंगम् अगुरु, केसरम्, त्वक्, रेणुका, नलिका प्रत्येकं १ भागः; तैलं १२० तोला, दधिमस्तु च १२० तोला, वारि ३६० तोला ।

विधिः—चन्दनादि द्रव्याणां कल्कं कृत्वा ततः तैलमस्तुवारिभिः तैलं पाचयेत् ।

प्रयोग :—ग्रहपीडां, अपस्मारम्, दाहं, पित्तज्वरम्, उन्मादं, अलक्ष्मीं, रक्तपित्तं, यक्ष्माणं च नाशयति। आयुः पुष्टिकरम्, बलवर्णकृत् च। मात्रा— पानार्थं १–२ तोला; अभ्यंगार्थं च उपयुज्यते। (चरक; यो. र.)

चन्दनासवः

चन्दनं (श्वेतं), उशीरम्, गम्भारी, नीलोफर, पद्मकं, लोध्रं, प्रियंगुः, मंजिष्ठा, रक्तचन्दनं, कटुकी, किरातः, वटजटा, मागधी, कर्चूरः, पर्पटः, यष्टिमधु, श्वेतरास्ना, कटुपटोलं, कांचनारत्वक्, आम्रत्वक्, मोचरसः, दारुहरिद्रा, हरिद्रा, शतावरी, वरुणत्वक्, पाषाणभेदः, अनंतमूलं प्रत्येकं १० तोला, द्राक्षा ५ शेर, शर्करा ३० शेर, धातकीपुष्पं ४ शेर। (भै. र.)

चन्द्रकलारसः

पारदः, ताम्रभस्म, अभ्रकभस्म प्रत्येकं १ तोला, शुद्ध बलिः ६ तोला, दाडिमस्वरसः, दूर्वास्वरसः, केतकीस्वरसः, सहदेवीस्वरसः प्रत्येकं १ भावना। (र. र. स.)

चन्द्रप्रभावटी (चन्द्रप्रभागुग्गुलः)

चन्द्रप्रभा (कर्पूरः वा शठी), वचा, मुस्ता, भूनिम्बः, गुडूची, देवदारु, हरिद्रा, अतिविषा, दार्वी, पिप्पलीमूलं, चित्रकः, धान्यकं, हरीतकी, बिभीतकः, आमलकं, चव्यं, विडंगं, गजपिप्पली, शुण्ठी, मरिचं, पिप्पली, स्वर्णमाक्षिकं, स्वर्जिकाक्षारः, यवक्षारः, सैन्धवं, सौवर्चलं, बिडं प्रत्येकं १ भागः, त्रिवृत्, दन्ती, पत्रकं, त्वक्, एला, वंशलोचनः प्रत्येकं ४ भागाः, लोहभस्म ८ भागाः, शर्करा १६ भागाः, शिलाजतु ३२ भागाः, गुग्गुलुः ३२ भागाः।

मात्रा—४–१२ गुटिका। (शा. सं.)

चन्द्रामृतरसः

शुण्ठी, मरिचम्, पिप्पली, हरीतकी, बिभीतकं, आमलकं, चव्यं, धान्यकं, जीरकं, सैन्धवं, पारदः, गन्धकं, लोहभस्म, अभ्रकभस्म, प्रत्येकं १ भागः, सौभाग्यं ८ भागाः, वासापत्ररसस्य ३ भावनाः। (भै. र.)

चन्द्रामृतावटी

अभया (शिवा), हरीतकी, मत्स्या, इन्द्रवारुणीमूलं, चक्रमर्दबीजम्, कंकुष्ठः, कालादाना, शुण्ठी, मरिचं, पिप्पली, बिभीतकं, मार्कंडी, त्रिवृत्, इन्द्रयवः, ऐलेयकः, आमलकम्।

वल्लमात्रा गुटिका कार्या। मात्रा—२–४ वटी। (आयुर्वेद निबन्धमाला)

चन्द्रोदयरसः (वटी)

सुवर्णभस्म १ तोला, मकरध्वजः, कर्पूरं, लवङ्गम्, केशरं, जातिफलं प्रत्येकं ८ तोला, कस्तूरी १ तोला। मात्रा—३–६ गुंजाः। प्रातः सायं।

अनुपानं—ताम्बूलस्वरसः वा आर्द्रकस्वरसः मधुना।

चविकासवः

चव्यं २०० भागाः, चित्रकं १०० भागाः, बाष्पिका (डीकामाली) ४० भागाः, पुष्करमूलं, वचा, हपुषा, शठी, पटोलमूलं, हरीतकी, बिभीतकः, आमलकं यवानी, कुटजत्वक्, विशाला (इन्द्रवारुणिका), धान्यकं, दन्ती, रास्ना प्रत्येकं ४० भागाः, विडंगं, मुस्ता, मंजिष्ठा, देवदारु, शुण्ठी, मरिचं, पिप्पली प्रत्येकं २० भागाः, जलं ८१९२ भागाः; अष्टमांशं अवशेषयेत् (१०२४)।

प्रक्षेप द्रव्याणि :—गुडः ३०० भागाः, धातकी ८० भागाः, त्वक्, तमालपत्रं, एला, नागकेशरं प्रत्येकं ८ भागाः, लवंगं, शुण्ठी, मरिचं, पिप्पली, कंकोलं प्रत्येकं ४ भागाः। विधिवत् साधयेत्। मासमेकं घृतभाण्डे निदध्यात्।

प्रातः चतुष्पलां मात्रां पिबेत्। (गदनिग्रहः)

चाङ्गेर्यादिघृतम्

नागरम्, पिप्पलीमूलं, चित्रकं, हस्तिपिप्पली, श्वदंष्ट्रा, पिप्पली, धान्यं, बिल्वं, पाठा, यमानिका प्रत्येकं १॥ तोला, एषां कल्कः कुडवः, चाङ्गेरी स्वरसः ८ प्रस्थं, दधि ८ प्रस्थं, घृतं २ प्रस्थम्।

विधि :—नागरादीनां कल्कैः घृतं पाचनीयम्।

प्रयोग :—ग्रहणी–प्रवाहिका–अर्शोगुदभ्रंश रोगेषु। मात्रा—०॥ तोला

(चरक, भै. र.)

चिञ्चाभल्लातकवटी

चिञ्चा, भल्लातकः प्रत्येकं १ भागः।

बदराकारा वटिका कार्या। मात्रा—१–२ वटी। (आयुर्वेद-निबंधमाला)

चित्रकादिवटी

चित्रकमूलत्वक्, पिप्पलीमूलं, सर्जक्षारः, यवक्षारः, सैन्धवं, सौवर्चलं, सामुद्रलवणं, बिड्लवणं, सांभरलवणं शुण्ठी, मरिचं, पिप्पली, हिंगु, अजमोदा, चव्यं प्रत्येकं १ भागः।

निम्बुरसेन दाडिमरसेन वा मर्दयेत्। मात्रा—२–६ गुंजा।

(चरक चि. अ. १५)

च्यवनप्राशः

बिल्वमूलं, अग्निमन्थमूलं, श्योनाकमूलं, काश्मरीमूलं, पाटलामूलं, बलामूलं, शालिपर्णीमूलं, पृश्निपर्णीमूलं, मुद्गपर्णीमूलं, माषपर्णीमूलं, श्वेतचन्दनं, वासामूलं, पिप्पली, श्वदंष्ट्रा, बृहतीमूलं, क्षुद्रामूलं, शृंगी, आमलकी, द्राक्षा, जीवन्ती, पुष्कर-मूलं, अगुरुः, रक्तचन्दनं, काकोली, अभया अमृता, ऋद्धिः, जीवकः, ऋषभकः, शठी, मुस्तं, पुनर्नवा, मेदा, सूक्ष्मैला, उत्पलं, विदारी, काकनासा प्रत्येकं ४ तोला आमलकानि ५०० संख्याकानि, जलं १०२४ तोला ।

सर्वम् एकध्यं विपाचयेत् । आमलकानि सुस्विन्नानि ज्ञात्वा निष्कुलीकृत्य संक्षुद्य घृते षट्पले तैले च षट्पले भृष्ट्वा, पादशेषं क्वाथं च गृहीत्वा, मत्स्यण्डिकां २०० तोला दत्वा सर्वम् लेहवत् साधयेत् ।

शीते मधु षट्पलं (२४ तोला), तुगाक्षीरी १६ तोला, पिप्पली ८ तोला, चातुर्जातं प्रत्येकं १ तोला दद्यात् ।

प्रयोग :— क्षये, स्वरभेदे, सर्वेषु कासेषु, श्वासेषु, क्षतक्षीणे, वृद्धेषु, बालेषु च अंगवर्धनार्थं, षण्ढत्वे, रसायनार्थे च युज्यते ।

मात्रा— १–२ तोला, दुग्धेन । (शार्ङ्गधर)

छुछुन्दरतैलम् (मूषकतैलं)

अन्त्रविहीनः छुछुन्दरः ५ तोला, तैलं २० तोला, जलं ८० तोला ।

विधि :— सम्यक् तैलं पाचयेत् ।

प्रोग :— लेपाभ्यंगात् गण्डमालां नाशयेत् योनिभ्रंशं गुदभ्रंशं चापि ।

जयमंगलरसः

पारदः, गन्धकं, सौभाग्यं, ताम्रभस्म, बंगभस्म, सुवर्णमाक्षिकभस्म, सैन्धवं, मरिचं प्रत्येकं १ तोला, सुवर्णभस्म १६ तोला, कान्तलोहभस्म ८ तोला, रौप्य-भस्म ८ तोला । कनकद्रवः, शेफालीद्रवः, दशमूलं, किराततिक्तः प्रत्येकं ३ भावनाः । (भै. र.)

जलोदरारिरसः

शु–पारदः २ तोला, शु–गन्धकं ४ तोला, मनःशिला, हरिद्रा, शुद्धजयपालः, त्रिफला, चित्रकमूलं प्रत्येकं २ तोला; दंतीमूलक्वाथः, स्नुहीदुग्धं, भृंगराजस्वरसः प्रत्येकं ७ भावनाः । मात्रा—२ रक्तिका, अनुपानं-दशमूलक्वाथेन । (भै. र.)

जातीफलादिचूर्णम्

जातीफलं, देवकुसुमं, एला, पत्रम् , त्वक्, नागकेशरं, कर्पूरं, चन्दनं, तिलः, वंशलोचनं, तगरः, आमलकं, तालीसपत्रम् , पिप्पली, हरीतकी, कृष्णजीरकः, चित्रकं, शुण्ठी, विडंगं, मरिचं प्रत्येकं १ भागः, विजया २० भागाः, शर्करा ४० भागाः। (शा. सं.)

जात्यादिघृतम्

जातिपत्राणि, निम्बपत्राणि, पटोलपत्राणि, हरिद्रा, दारुहरिद्रा, कटुकी, मंजिष्ठा, यष्टिमधु, करंजबीजं, बालकं, अनंतमूलं, तुत्थं, मधूच्छिष्टं प्रत्येकं १ तोला, घृतं ५० तोला।

सर्वाणि वनस्पतिद्रव्याणि कल्कीकृत्य कटाहे घृतेन सार्धं पाकं कृत्वा मधूच्छिष्टं चान्ते दत्वा गालयेत् घृतम्। विशेष मधूच्छिष्ट प्रक्षेपात् घनो मलहरो भवति। बाह्यप्रयोगेषु एव युज्यते।

प्रयोग :— व्रणे, नाडीव्रणे, भगंदरे, कुष्ठे, फिरंगजे उपदंशजे व्रणे, अर्शआदौ च व्रणबंधनात् लेपाभ्यंगात्, वर्तिप्रदानत् च साधु भवति। शोधनं रोपणं च। (यो. र.)

जात्यादितैलम्

जातिपल्लवाः, करंजपत्राणि, निम्बपत्रं, कुष्ठम् , दारुहरिद्रा, मंजिष्ठा, लोध्रं, नीलोत्पलं, कृतमालबीजं, पटोलपत्रं, मधूच्छिष्टं, यष्टिमधु, हरिद्रा, कटुका, पद्मकाष्ठं, हरीतकी, अनंतमूलं प्रत्येक १ तोला, तिलतैलं ६० तोला, जलम् २०० तोला।

विधि :—तैलाद् विना सर्वेषां द्रव्याणां कल्कं कृत्वा, तैलं जलं कल्कं च एकत्र वह्नौ पाचयेत्, तैल शेषे च गालयेत्।

प्रयोग :—व्रण–नाडीव्रण, पामा, कंडू, किटिम सद्योव्रण विद्रधि दग्धव्रणेषु— बहिःप्रयोगार्थं वर्ति पिचु द्वारेण युज्यते। (शा. सं)

जांबवासवः

जम्बूस्वरसः ४०० तोला, शर्करा १०० तोला, रोहितकत्वक् ५ तोला, विडंगं २ तोला, लोहभस्म ५ तोला, मंडूरभस्म ५ तोला, धातकीपुष्पं १० तोला, त्रिवृत् , शक्रयवः, त्वक् , तमालत्वक् , नागपुष्पं, नागरं प्रत्येकं १ तोला, मरिचं, मागधी, अभया, बिभीतकं, आमलकं, यवानी, चित्रकं प्रत्येकं २ तोला, हरिद्रा, कटुकी, एला प्रत्येकं १ तोला, विजयसारः २ तोला।

जीवन्त्यादिघृतम्

जीवन्ती, मधुकं, द्राक्षा, कुटजफलं, शटी, पुष्करमूलं, दुरालभा, व्याघ्री, गोक्षुरकं, बला, नीलोत्पलं, आमलकं, त्रायमाणा, पिप्पली प्रत्येकं १ तोला।

विधि :—एतेषां कल्कैः क्षीरं अष्टगुणं दत्वा घृतस्य प्रस्थं विपाचयेत्।

प्रयोग :—रक्तपित्ते, क्षयजकासे, एकादशरूपयुक्ते त्रिरूपे च राजयक्ष्मणि। मात्रा—१–२ तोला दुग्धेन। (यो. र.)

जूफादिक्वाथः

जूफा, गुले गावज़बां, कासनी, उस्तखुद्दूस, उन्नाब, यष्टिमधु, बिभीतकं, कर्कटशृंगी, अंजीर, मुनक्का, वासा, कुलत्थः। (नूतन कल्प)

ज्वरघ्नक्वाथः

कटुरोहिणी, वन्यजीरकं, धन्वयासः, सिंहलतिक्ता, कुटजत्वक्, कुबेराक्षः, गुडूची, निम्बपत्रं, पटोलपत्रं, सिंकोनात्वक्, सप्तपर्णत्वक्। मात्रा—२–४ कर्षः।

(नूतन कल्पः)

ज्वरघ्नी

पारदः, गन्धकं (कटुतैल शोधितं), अैलेयकः, पिप्पली, हरीतकी, आकारकरभः, इन्द्रवारुणीफलं प्रत्येकं १ भागः। गुंजाप्रमाणा गुटिका इन्द्रवारुणीफलरसेन कार्या। मात्रा—२–४ वट्यः। (शा. सं.)

तक्रारिष्टः

हपुषा, कुञ्चिका, धान्यं, अजाजी, कारवी, शटी, पिप्पली, पिप्पलीमूलं, चित्रकं, हस्तिपिप्पली, यमानी, अजमोदा प्रत्येकं १ भागः, तक्रम् १२८ भागाः।

मिश्रितं घृतभाजने स्थापयेत्। व्यक्ताम्लकटुकं जातं तक्रारिष्टं मात्रया पिबेत्। मात्रा – भोजनस्य आदिमध्यान्तेषु तृषितः पिबेत्। (चरक, चि. अर्शोऽधिकारे)

तगरादिक्वाथः

तगरः, अश्वगन्धा, पर्पटः, शंखपुष्पी, देवदारु, तिक्ता, ब्राह्मी, जटामांसी, मुस्ता, कृतमालः, हरीतकी, द्राक्षा प्रत्येकं १ भागः। मात्रा १–२ कर्षः।

(यो. र.)

ताप्यादिलोहः

सुवर्णमाक्षिकभस्म, लोहभस्म, विडंगम् , शिलाजतु, अभया प्रत्येकं १ भागः। मात्रा — ३–६ गुंजा। (सि. यो. सं.)

ताम्रपर्पटी

ताम्रभस्म ३ तोला, पारदः ३ तोला, गन्धकं ६ तोला, वत्सनाभः १ तोला। मात्रा—१–३ गुंजा। अनुपानम्—जीरकसंयुता। (यो. र.)

तालसिन्दूरम

शु–तालं ५ तोला, शु–पारदः १० तोला, शु–गंधकम् १० तोला, कुमारी-स्वरसस्य १ भावना। वालुकायंत्रे क्रमात् पचेत्। मात्रा—१–२ गुंजा।

अनुपानम्—आर्द्रकस्वरसः मधु।

तालीसादिचूर्णम्

तालीसपत्रं २ भागौ, मरिचम् ४ भागाः, शुण्ठी ६ भागाः, पिप्पली ८ भागाः, वंशलोचनम् १० भागाः, एला १ भागः, त्वक् १ भागः, शर्करा ६४ भागाः।

मात्रा—२–८ गुंजा (चरक, चि. अ. ८)

तिक्तकघृतम्

त्रिफला ६ पलानि, हरिद्राद्वयम् ४ पलानि, वासा, यवासः, पर्पटः, त्रायमाणा, कटुका, निम्बपत्राणि प्रत्येकं २ पले, जलं २ द्रोणौ।

चतुर्थांशशेषे क्वाथमवतार्य वस्त्रपूतं कृत्वा तस्मिन्

घृतं २ प्रस्थौ, पिप्पलीकल्कः, मुस्ताकल्कः, चन्दनकल्कः, त्रायमाणाकल्कः, इन्द्रयवकल्कः, भूनिम्बकल्कः प्रत्येकं २ पले दत्त्वा

सर्वम् एकत्र पाचयेत्। सिद्धम् घृतं वस्त्रपूतं रक्षयेत्।

प्रयोग :— कुष्टे, ज्वरे, पाण्डुरोग–कामला–विसर्पेषु च पानार्थम्।

(भै. र.)

त्रायमाणघृतम्

त्रायमाणा १६ तोला, जलं १६० तोला, कल्कार्थे—रोहिणी, कटुका, मुस्ता, त्रायमाणा, दुरालभा, द्राक्षा, तामलकी, शतावरी, जीवन्ती, चन्दनम् , कमलं, प्रत्येकं १ तोला, आमलकानां रसः ३२ तोला, क्षीरम् ३२ तोला, घृतं ३२ तोला।

विधि :— प्रथमं त्रायमाणां जलेन क्वाथयित्वा पंचमांशः क्वाथः ग्राह्यः। तस्मिन् कल्क द्रव्याणां कल्कं, शेषाणि द्रव द्रव्याणि च संमेल्य घृतं पाचयेत्।

प्रयोग :—पित्तगुल्मं, रक्तगुल्मं, विसर्पम्, कामलां, कुष्ठं, हृद्रोगं च हरेत्। (वृन्दात्)

त्रिकटुचूर्णम्

शुण्ठी, मरिचं, पिप्पली प्रत्येकं १ भागः। मात्रा—६–१२ गुंजा।

त्रिफलागुग्गुलुः

त्रिफलाचूर्णम् १२ भागाः, कृष्णा ४ भागाः, गुग्गुलुः २० भागाः।

घृतेन पिण्डीकृत्य मोदकाः कार्याः। मात्रा—४–८ गुटिकाः। (शा. सं.)

त्रिफलाघृतम्

त्रिफला ३ कर्षाः, त्रिकटु ३ कर्षाः द्राक्षा, यष्टिमधु, कटुरोहिणी, प्रपौण्डरीकं, सूक्ष्मैला, विडंगम्, नागकेशरम्, नीलोत्पलं प्रत्येकं १ कर्षः, सारिवाद्वयं २ कर्षौ, चन्दनं १ कर्षः, हरिद्राद्वयं २ कर्षौ, गोघृतं २ प्रस्थौ, गोदुग्धम् २ प्रस्थौ, त्रिफलाक्वाथः ६ प्रस्थः। यथाविधि पचेत्।

प्रयोग :—नेत्ररोगेषु, तिमिरे, विषमज्वरे, कामलायाम्, विसर्पप्रदर-पाण्ड्वादिषु च। मात्रा—१ तोला, पानांजननस्यादिषु। (भै. र.)

त्रिफलाचूर्णम्

हरीतकी, बिभीतकं, आमलकम्। मात्रा—०॥–१ कर्षः।

त्रिफलारिष्टः

हरीतकी, बिभीतकं, आमलकं, पिप्पली, चित्रकमूलं, अजमोदा, विडंगं प्रत्येकं १६ भागाः, जलम् २००० भागाः। क्वाथः कार्यः। चतुर्थांशं शेषयेत्।

प्रक्षेपद्रव्याणि – लोहभस्म १६ भागाः, गुडः ४०० भागाः, मधु ३२ भागाः। घृतभाण्डे मासमेकं निधाय वस्त्रपूतं प्रयोजयेत्। मात्रा—१–२ कर्षः।

(ग. नि.)

त्रिभुवनकीर्तिरसः

हिंगुलं, विषं, शुण्ठी, मरिचं, पिप्पली, सौभाग्यं, ग्रन्थिकं, प्रत्येकं ५ तोला। तुलसीस्वरसः आर्द्रकस्वरसः धत्तूरस्वरसः प्रत्येकं ३ भावनाः। (यो. र.)

त्रिविक्रमरसः

ताम्रं, पारदः, गन्धकं प्रत्येकं ५ तोला। निर्गुण्डी स्वरसे मर्दनम्।

यामैकं वालुकायन्त्रे पक्त्वा योज्यं द्विगुंजकम्।
बीजपूरस्यमूलञ्च सजलं चानुपाययेत्॥ (शा. सं.)

त्रैलोक्यचिन्तामणिरसः

पारदः, हीरकभस्म, सुवर्णभस्म, रजतभस्म, ताम्रभस्म, अभ्रकभस्म, गंधकं, मुक्ताभस्म, शंखभस्म, प्रवालभस्म, हरितालभस्म, मनःशिला प्रत्येकं १ तोला। चित्रकक्वाथः, अर्कदुग्धं, निर्गुण्डीस्वरसः, स्नुहीदुग्धं, सूरणस्वरसः प्रत्येकं ३ भावनाः। (भै. र.)

दद्रुघ्नसोगठी

सौभाग्यपुष्पं, स्फटिकापुष्पं, सर्जनिर्यासः, गन्धकं, चक्रमर्दबीजम्, जम्बीरस्वरसेन वर्तिः कार्या। (नूतन कल्पः)

दन्तोद्भेद गदान्तकरसः

पिप्पली, पिप्पलीमूलं, चव्यम्, चित्रकं, शुण्ठी, अजमोदा, यवानी, हरिद्रा, दारुहरिद्रा, विडंगं, एला, नागकेशरम्, नागरमुस्ता, कर्पूरम, कर्कटश्रृंगी, बिड्लवणं, अभ्रकभस्म, शंखभस्म, लोहभस्म, सुवर्णमाक्षिकभस्म, प्रत्येकं १ तोला। दुग्धेन भावयेत्। (भै. र.)

दशमूलक्वाथः

बिल्वः, अग्निमन्थः, श्योनाकः, काश्मरी, पाटला, शालिपर्णी, पृश्निपर्णी, बृहती, कंटकारिका, गोक्षुरः प्रत्येकं १ भागः। मात्रा—१–२ कर्षः। (शा. सं.)

दशमूलारिष्टः

दशमूलानि २०० भागाः, चित्रकत्वक् १०० भागाः, पुष्करमूलं १०० भागाः, लोध्रम् ८० भागाः, अमृता ८० भागाः, आमलकं ६४ भागाः, दुरालभा ४८ भागाः, खदिरः, बीजसारः, हरीतकी प्रत्येकं ३२ भागाः, कुष्ठम्, मंजिष्ठा, देवदारु, विडंगम्, यष्टिमधु, भार्गी, कपित्थः, अक्षः, पुनर्नवा, चव्यं, मांसी, प्रियंगुः, सारिवा, कृष्णजीरकं, त्रिवृत्, रेणुका, रास्ना, पिप्पली, क्रमुकः (पूगीफलं), शठी, हरिद्रा, शतपुष्पा, पद्मकम्, नागकेशरम्, मुस्ता, इन्द्रयवः, शुण्ठी, जीवकः, ऋषभकः, मेदा, महामेदा, काकोली, क्षीरकाकोली, ऋद्धिः, वृद्धिः प्रत्येकं ८ भागाः।

अष्टगुणजले क्वाथः, चतुर्थांश शेषः । पश्चात्

द्राक्षा २५६ भागाः, जलम् १०२४ भागाः दत्त्वा

क्वाथः कार्यः, त्रिपादशेषम् पूर्वक्वाथे क्षिपेत् । तत्र,

मधु १२८ भागाः, गुडः १६०० भागाः, धातकीपुष्पं १२० भागाः, कंकोलः, उशीरम्, चन्दनं, जातिफलं, लवंगम्, त्वक्, एला, तमालपत्रम्, पिप्पली, नागकेशरम् प्रत्येकं ८ भागाः, कस्तूरी ०। भागः इमानि प्रक्षेपद्रव्याणि निक्षिप्य विधिवत् साधयेत् । मात्रा—१–२ कर्षः ।

दशांगलेपः

शिरीषत्वक्, मधुयष्टी, तगरम्, रक्तचंदनं, एला, मांसी, दारुहरिद्रा, हरिद्रा, कुष्ठम्, बालकम् प्रत्येकं १ तोला ।

विधि :—संचूर्ण्य पंचमांशघृतप्लुत लेपः जलेन क्रियते ।

प्रयोग : —विसर्प, विष, विस्फोट शोथ–दुष्टव्रणान् जयति, विषज शोथं च ।

दार्व्यादिक्वाथः

दार्वी, रसांजनम्, वृषः, मुस्ता, किराततिक्ता, श्रीफलम् (बिल्वः), भल्लातकं प्रत्येकं १ भागः ।

मात्रा—१–२ कर्षः । (शा. सं)

दावानलचूर्णम्

शुण्ठी, मरिचम्, पिप्पली, सैन्धवम्, सौवर्चलम्, विड्लवम् (नरसारः), कपित्थगर्भः, घृतभर्जितहिंगु प्रत्येकं १ भागः । मात्रा— १–२ शाणः ।

दीपिकातैलम्

बृहत्पंचमूलस्य काष्ठानि, अष्टांगुल परिमितानि ।

विधि :—अतसी वस्त्रेण आवेष्ट्य तैलेन संसिच्य दहेत् । तस्मात् च्युतेन तैलेन सुखोष्णेन कर्णपूरणम् ।

प्रयोग :—कर्णशूले, बाधिर्ये च ।

नोंध :—निर्दिष्टया रीत्या देवदारुकाण्डस्यापि तैलं क्रियते ।

(भै. र., सुश्रुत, उ. तं.)

दुग्धवटी

वत्सनाभः, कनकबीजं, अहिफेनम् । (भै. र.)

देवदार्वादिक्वाथः

देवदारु, वचा, कुष्ठम् , पिप्पली, विश्वभेषजम् , कट्फलं, मुस्ता, भूनिम्बः, तिक्तकं (कटुका), धान्यकं, हरीतकी, गजकृष्णा, दुःस्पर्शा (दुरालभा), गोक्षुरः, धन्वयासकं, बृहती, अतिविषा, छिन्ना (अमृता), कर्कटशृङ्गी, वन्यजीरकं (कालीजीरी), प्रत्येकं १ भागः ।

मात्रा—२-४ कर्षाः ।

दोषघ्नलेपः

पुनर्नवामूलं, देवदारु, शुण्ठी, सिद्धार्थकः, शिग्रुः प्रत्येकं १ तोला ।

तक्रेण पिष्ट्वा वा काकमाचीरसेन पिष्ट्वा प्रलेपः कार्यः । (शा. सं.)

द्राक्षादिगुटिका (कल्याणवटकः)

उद्धृतबीजा कपिला द्राक्षा १ भागः, अभया १ भागः, शर्करा २ भागौ ।

मात्रा—१-२ कर्षः । (ग. नि.)

द्राक्षारिष्टः

द्राक्षा २०० कर्षाः, जलम् १०२४ कर्षाः ।

क्वाथयेत् , पादशेषं च गालयेत् । गुडः ८०० कर्षः ।

प्रक्षेपद्रव्याणि—त्वक्, एला, पत्रम् , नागकेशरम , प्रियंगुः, मरिचं, कृष्णा, विडंगं प्रत्येकं ४ कर्षाः ।

जातरसं पिबेत् । मात्रा—१-२ कर्षः । (शा. सं.)

द्वात्रिंशदाख्यक्वाथः (भार्ग्यादिक्वाथः)

भार्गी, भूनिम्बः, निम्बः, मुस्ता, कटुकी-का, वचा, शुण्ठी, मरिचं, पिप्पली, वासा, विशाला (इन्द्रवारुणी), रास्ना, अनन्ता (अनन्तमूलं), पटोलः, देवदारु, हरिद्रा, पाटला, टुण्टुकः, ब्राह्मी, दारुहरिद्रा, अमृता, त्रिवृत् , अतिविषा, पुष्करमूलं, त्रायमाणा, व्याघ्री (कंटकारिका), सिंही (बृहती), कलिंगः (इन्द्रयवः), हरीतकी, बिभीतकं, आमलकं, शठी प्रत्येकं १ भागः ।

मात्रा—२-४ कर्षाः । (यो. र.)

द्विरुत्तरचूर्णम्

हिंगु १ भागः, वचा २ भागौ, चित्रकं ४ भागाः कुष्ठं १६ भागाः, विडंगं ३२ भागाः।

विडंगस्थाने हिंगुपत्रिका (डीकामाली) ग्राह्या। मात्रा - २-४ माषाः।
(च. चि. २६/२०)

धात्रीरसायनम्

पक्वानि आमलकानि, दुग्धम्, जलम् प्रत्येकं २॥ शेर, गोघृतं १० तोला, शर्करा ५ शेर, अर्कगुलाब ०॥ शेर।

प्रक्षेपद्रव्याणि :—सूक्ष्मैला, बृहदैला, नागरमुस्ता, अगुरुः, तगरम्, जटामांसी, तालीसं, लवंगम्, तरुणीपुष्पं, गन्धशठी, अबरेशम, श्वेतचन्दनं, वंशरोचना, रूमीमस्तगी, जातीफलं, जातिपत्री, केशरम्, तमालपत्रं, धान्यकं, कृष्णजीरकं, जद्वार, त्वक्चूर्णं, बीजपूरकत्वक् प्रत्येकं १ तोला, रौप्यपत्राणि १०० (नंग) संख्याकानि, सुवर्णपत्राणि २५ (नंग) संख्याकानि।

विकल्पे प्रक्षेपः—कस्तूरी, मुक्तापिष्टी, अम्बर, प्रवालपिष्टी प्रत्येकं १ तोला।

विधि :—आमलकानि अहोरात्रं दुग्धे स्थापयित्वा-द्वितीयेदिने प्रक्षाल्य जले, क्वाथयेत्-अस्थि विमुक्तावस्थापर्यंतम्। पश्चात् तेषां कल्कं घृतेन मंदाग्नौ भृष्ट्वा किंचित् स्नेहवियोगावस्थाभावम् यावत्। पश्चात् अर्कगुलाबे, शर्करायाः अवलेहं कृत्वा तस्मिन् आमलककल्कं आलोड्य भूमौ उत्तार्य प्रक्षेपद्रव्याणां चूर्णं दत्वा सुष्ठु रक्षेत् ४० दिनपर्यंतम्।

प्रयोग :—रसायनं, वाजीकरम्, पुष्टिदं, मेध्यं च।

मात्रा—१ तोला, दुग्धेन, भोजनात् ३ होरा अर्वाक्। (सि. यो.)

धात्रीलोहः

आमलकचूर्णं ८ पलानि, लोहभस्म ४ पलानि, यष्टिमधुचूर्णं २ पलानि। गुडूचीक्वाथस्य ७ भावनाः। (चक्रदत्त भै. र.)

धान्वन्तरम् घृतम्

दशमूलं १० पलानि, द्वि-करंजफलानि ४ तोला, देवदारु, हरीतकी, वर्षाभूः, वरुणत्वक्, दन्तीमूलं, चित्रकं, पुनर्नवामूलं, सुधामूलं, निम्बफलं, कदम्बफलं, बिल्वफलं, भल्लातकं, शटी, पुष्करमूलं, पिप्पलीमूलं प्रत्येकं २ तोला।

यवकोलकुलत्थाः प्रत्येकं ३ प्रस्था, जलं द्रोणः (१०२४ तोला), एतेषां १/४ क्वाथः कार्यः । तेन घृतप्रस्थं निम्नानां कल्कं दत्वा पाच्यम् । कल्कद्रव्याणि—३२ तोला सर्वाणि मिलित्वा ।—हिज्जलः, त्रिफला, भार्गी, रोहिषं, गजपिप्पली, शृंगवेरम्, विडंगानि, वचा, कंपिल्लकः ।

प्रयोग :—कुष्ठे, गुल्मे, प्रमेहे, शोथे, वातरक्ते, प्लीहोदरे, प्रमेहपिडकासु, अपस्मारे, उन्मादे, अर्शस्सु । मात्रा—१ तोला । (भै. र.)

नवायसलोहः

शुण्ठी, मरिचं, पिप्पली, हरीतकी, बिभीतकं, आमलकं, मुस्ता विडंगम्, चित्रकमूलत्वक् प्रत्येकं १ भागः, लोहभस्म ९ भागाः ।

मात्रा—२–४ गुंजाः । (चरक. सं. चि. अ. १६)

नारसिंहचूर्णम्

शतावरीचूर्णम् ६४ भागाः, गोक्षुरः ६४ भागाः, वाराहीकंदः ८० भागाः, गुडूची १०० भागाः, भल्लातकं १२८ भागाः, चित्रकमूलत्वक् ४० भागाः, तिलः ६४ भागाः, त्वक् ११ भागाः, पत्रकं ११ भागाः, एला ११ भागाः, शर्करा २८० भागाः, विदारीकंदः ६४ भागाः ।

मात्रा—०॥–१ कर्षः । (सि. यो. सं.)

नाराचरसः

ताम्रभस्म, पारदः, गन्धकं, शु–जयपालः, हरीतकी, बिभीतकं, आमलकं, शुण्ठी, मरिचं, पिप्पली प्रत्येकं १ तोला । (यो. र.)

नारायणतैलम्

अश्वगंधा, बलामूलं, बिल्वमूलं, काश्मरीमूलं, कंटकारीमूलं बृहतीमूलं प्रत्येकं ४ तोला, गोक्षुरम्, अतिबला, निम्बत्वक्, टुण्टुकमूलं, पुनर्नवामूलं, अरणीमूलं, प्रसारणी प्रत्येकं ५ तोला, जलम् ५०० तोला ।

एतेषां क्वाथं चतुर्थांशं कृत्वा । शतावरी १२ तोला, जलम् १०० तोला । एतस्यापि चतुर्थांशं क्वाथं गृहीत्वा ।—

वचा, चन्दनं, कुष्ठं, एला, बलामूलं, जटामांसी, सैन्धवं, तगरम्, अश्वगंधा, रास्ना, शतपुष्पा, देवदारु, शालपर्णी, पृश्निपर्णी, मुद्गपर्णी, माषपर्णी प्रत्येकं १ तोला ।

एतेषां कल्कं कृत्वा पश्चात् तिलतैलं ४० तोला, प्रथमं द्वितीयं च क्वाथं, कल्कं गोदुग्धं १०० तोला, एकत्र विपाचयेत् ।

प्रयोग :—वातव्याधो पानाभ्यंगे, नस्ये, बस्तौ च। मूढगर्भे, वन्ध्यत्वे, षाण्ढ्ये, शूले, वृषणवाते, भग्ने, पंगुरोगे, क्षीणेन्द्रियत्वे, शुक्रक्षये अन्त्रवृद्धौ, मन्दबुद्धौ, बाधिर्ये, वैस्वर्ये चापि उपयुज्यते। (शा. सं. यो. र.)

नित्यानंदरसः

पारदः, गन्धकं, ताम्रभस्म, कांस्यभस्म, बंगभस्म शु–हरितालं, शु-तुत्थं, शंखभस्म, कपर्दिकाभस्म, शुण्ठी, मरिचं, पिपली, हरीतकी, बिभीतकं, आमलकं, लोहभस्म, विडंगम् प्रत्येकं १ तोला, पंचलवणानि, चव्यं, पिप्पलीमूलं, हपुषा, वचा, कर्पूरम्, पाठाः, देवदारु, एला, वृद्धदारकं, त्रिवृत्, चित्रकं, दन्ती प्रत्येकं १ तोला, हरीतकीक्वाथस्य १ भावना। (भै. र.)

निदिग्धिकादिक्वाथः

निदिग्धिका, बला, रास्ना, त्रायमाणा, अमृता, श्यामात्रिवृत् प्रत्येकं १ भागः।
मात्रा—१–२ कर्षः। (भै. र.)

निद्रोदयरसः

अहिफेनम्, वंशलोचनम्, आमलकम्, हिंगुलम् १ भागः।
विजयाक्वाथेन मर्दयेत्। मुद्गाभा गुटिका कार्या।
मात्रा—१–२ वटी। (र. त.)

निर्गुण्डीतैलम्

निर्गुण्डीस्वरसः ४ प्रस्थाः, तिलतैलं १ प्रस्थम्, लांगलीमूलकल्कः १६ तोलकाः। यथाविधि तैलं पाचयेत्। नस्यार्थं गण्डमालायाम्; अभ्यंगार्थं वातव्याधौ।
(शार्ङ्गधर)

पंचकोलचूर्णम्

पिप्पली, चव्यं, शुण्ठी, पिप्पलीमूलं, चित्रकम् प्रत्येकं १ भागः।
मात्रा—०। कर्षः। (शा. सं.)

पंचगव्यघृतम्

गोशकृद्रसः, गोदधि, गोक्षीरम्, गोमूत्रं प्रत्येकं १० तोला, गोघृतं ४० तोला।
सर्वाणि द्रव्याणि एकस्मिन् कटाहे गृहीत्वा पाचयेत्।

प्रयोग :— उन्मादं, चातुर्थिकज्वरम्, ग्रहपीडां, अपस्मारम् च नाशयति।

मात्रा — १–२ तोला पानार्थं; ५–१० बिन्दवः नस्यार्थम्।

पंचगुणतैलम्

निम्बपत्राणि २० तोला, त्रिफला २० तोला, निर्गुण्डीपत्राणि २० तोला, जलम् ४०० तोला।

विधि :— सर्वम् क्वाथयित्वा ०। शेषे वस्त्रपूतं कृत्वा तेन निम्नोक्तानि द्रव्याणि संमेल्य तैलं पाचयेत्। तिलतैलं ८० तोला, गुग्गुलुः ६ तोला, सर्जरसः ६ तोला, मधूच्छिष्टं, शिलारसः, गंधबिरौजा प्रत्येकं ६ तोला, एसिड कार्बोलिक २॥ तोला संमेल्य उपयोगः कार्यः।

प्रयोग :— व्रणं, नाडीव्रणं, दग्धव्रणं, कर्णपाकं, घृष्टं–भिन्नं शस्त्राघातं अलर्जी च नाशयेत्। रक्तस्रावं च स्तम्भयति। व्रणोपरि तैलं दत्वा पट्टं बध्नीयात्।

(वै. चि. सा.)

पंचतिक्तघृतगुग्गुलुः

क्वाथ्य द्रव्याणि :— निम्बत्वक् २ शेर, गुडूची, २ शेर, वासा ४ शेर, कटुपटोलं २ शेर, कंटकारी १। शेर, गोरखमुंडी, कृतमालकमूलं, शिग्रुत्वक्, वरुणत्वक्, कांचनारत्वक्, निर्गुण्डीमूलं, मुस्ता प्रत्येकं ४ शेर।

कल्कद्रव्याणि :— गुग्गुलुः २।॰ शेर, गोघृतं ६॥ शेर, पाठामूलं, विडंगम्, देवदारु, मागधी, सर्जक्षारः, यवक्षारः, शुण्ठी, हरिद्रा, शतपुष्पा, यवकः, कुष्ठं, ज्योतिष्मतीबीजं, मरिचं, शक्रयवः, अजमोदा, चित्रकमूलं, कटुकी, भल्लातकं, वचा, ग्रंथिकं, मंजिष्ठा, अतिविषा, अभया, बिभीतकं, आमलकं, यवानी प्रत्येकं ४ तोला। घृतविधिना पाचयेत्।

पंचसकारचूर्णम्

मार्कण्डी ४ भागाः, शिवा २ भागौ, शुण्ठी, शतपुष्पा, सैन्धवम् वा सौवर्चलम् प्रत्येकं १ भागः।

मात्रा — ३–६ माषाः। (सि. भे. म.)

पंचामृतपर्पटी

गंधकं ८ तोला, पारदः १० तोला, लोहभस्म २ तोला, अभ्रकभस्म १ तोला, ताम्रभस्म ०॥ तोला।

मात्रा — १–२ रक्तिका। अनुपानम्–तक्रनम्।

पथ्यादिषडंगक्वाथः

पथ्या, अक्षः, धात्री, भूनिम्बः, हरिद्रा, निम्बः, अमृता प्रत्येकं १ भागः। क्वाथ कार्यः। सगुडः शीर्षशूलहृत्।

मात्रा – १–२ कर्षः। (शा. संहिता)

पद्मकादितैलम्

पद्मकाष्ठं, यष्टिमधु, उशीरः, हरिद्रा प्रत्येकं १० तोला, जलम् ६४० तोला, १/८ अवशेषयेत् क्वाथम्। तिलतैलं २० तोला।

कल्कद्रव्याणि :– सर्जरसः, मंजिष्ठा, शतावरी, चंदनम् प्रत्येकं १ तोला, विधिवत् तैलम् साधयेत्।

प्रयोग :—विसर्पे, पित्तजे व्रणे, विपादिकायां लेपार्थे च।

मात्रा—०।।–१ कर्षः।

पायोरिया प्रवाही

एरण्डतैलं २।। तोला, कर्पूरम् ०। तोला, त्वक्तैलम् ५ बिन्दवः, थाइमोल २ गुंजाः। दंतपूय रोगे।

पिप्पलीक्षीरघृतम्

गोघृतं १ प्रस्थः, दुग्धम् ४ प्रस्थः, जलम् १६ प्रस्थः।

कल्कार्थे :—गुडः ८ तोला, पिप्पली ८ तोला।

एकध्यं कृत्वा घृतं विपाचयेत्।

प्रयोग :—अम्लपित्ते, परिणामशूले, यकृत् प्लीहवृद्धौ, जीर्णज्वरे च।

मात्रा—०।। तोला यावत् क्षीरानुपानम्।

पीतकचूर्णम्

दार्वीत्वक् (दारुहरिद्रात्वक्), सैन्धवम्, मनःशिला, यवक्षारः, हरितालं प्रत्येकं १ भागः। दन्तास्यगलामये समध्वाज्यः मुखे धार्यः।

पुनर्नवादिक्वाथः

पुनर्नवा, दारुनिशा, हरिद्रा, शुण्ठी, हरीतकी, अमृता, चित्रकः, भार्गी, देवदारु प्रत्येकं १ भागः। मात्रा —२–४ कर्षाः।

पुनर्नवामण्डूरम्

पुनर्नवा, त्रिवृत्, शुण्ठी, मरिचं, पिप्पली, विडंगम्, देवदारु, चित्रकं, कुष्ठः, हरिद्रा, हरीतकी, बिभीतकं, आमलकं, दन्तीमूलं, चव्यं, शक्रयवः, कटुकी, पिप्पलीमूलं, मुस्ता, कर्कटशृंगी, कृष्णजीरकं, यवानी प्रत्येकं ५ तोला, कट्फलम् २ तोला, शुद्ध मंडूरम् २२० तोला।

अष्टगुणे गोमूत्रे पाचयेत्। ४ रक्तिकोन्मिता गुटिका।

मात्रा—१–२ गुटिका। अनुपानम्—पुनर्नवादिक्वाथः।

पुनर्नवाष्टकक्वाथः

पुनर्नवा, हरीतकी, निम्बत्वक्, दारुहरिद्रा, तिक्ता, पटोलपत्रं, अमृता (गुडूची), शुण्ठी प्रत्येकं १ भागः। यकृत्प्लीह्नोः विद्रध्यादि–विकारेषु समभाग वरुण-रोहितक–शिग्रु संयोगः कार्यः। मात्रा—२–४ कर्षाः।

(सि. यो. सं.)

पुष्यानुगचूर्णम्

पाठाः, जम्बूबीजम्, आम्रबीजमज्जा, पाषाणभेदः, रसाञ्जनम्, अम्बष्ठा, मोचरसः, वत्सकत्वक्, लज्जालुः, कुंकुमम्, अतिविषा, बिल्वं, मुस्ता, लोध्रः, गैरिकं, कट्फलं, मरिचं, शुण्ठी, द्राक्षा, रक्तचन्दनं, वत्सकं, अनन्ता, धातकी, मधुयष्टी, अर्जुनः, अरलुः प्रत्येकं १ भागः।

मात्रा—२–४ माषाः। (चरक चि. अ. ३०)

प्रतापलंकेश्वररसः

शु–पारदः, अभ्रकभस्म, शु–गन्धकं, वत्सनाभः प्रत्येकं १ तोला, मरिचं ३ तोला, लोहभस्म ४ तोला, शंखभस्म ८ तोला, अरण्योपलभस्म १६ तोला।

(यो. र.)

प्रदरान्तकरसः

शु–पारदः, शु–गन्धकं, वंगभस्म, रजतभस्म, खर्परभस्म, कपर्दिकाभस्म प्रत्येकं ५ माषाः, लोहभस्म ३॥ तोला। कुमारीस्वरसभावना। (भै. र.)

प्रदरान्तकलोहः

लोहभस्म, ताम्रभस्म, शु तालः, बंगभस्म, अभ्रकभस्म, कपर्दिकाभस्म, शुण्ठी, मरिचं, पिप्पली, हरीतकी, बिभीतकं, आमलकं, चित्रकं, विडंगम् प्रत्येकं १ तोला, पंचलवणं पृथक्, चव्यं पिप्पली, शंखभस्म, वचा, हपुषा, कुष्टः, शठी, देवदारु, एला, वृद्धदारकः प्रत्येकं १ तोला। (र. सा. सं.)

प्रभावतीवटी

माक्षिकभस्म, लोहभस्म, अभ्रकभस्म, तुगाक्षीरी, शिलाजतु प्रत्येकं १ भागः। अर्जुनरसेन मर्दयेत्। गुंजाद्वयमितां वटीम् कुर्यात्।

मात्रा—४–८ गुंजाः। (भै. र.)

प्रमेहहरकषायः

दार्वी, हरिद्रा, अमृता, बिभीतकं, आमलकं, अभया, देवदारु, मुस्ता, उशीरम्, लोध्र, श्वेतचंदनं, कमलपुष्पं, पद्मकाष्ठम्, गोक्षुरं, पटोलः प्रत्येकं १ माषः।

मात्रा—तोला १ क्वाथः। (सि. यो. सं.)

प्रवालपंचामृतरसः

प्रवालभस्म २ तोला, शंखभस्म, मुक्ता, कपर्दिकाभस्म, शुक्तिभस्म प्रत्येकं १ तोला, अर्कस्वरसस्य १ भावना, १ पुटम्। (यो. र.)

फलघृतम्

मंजिष्ठा, यष्टिमधु, कुष्ठं, हरीतकी, बिभीतकं, आमलकं, शर्करा, वचा, अजमोदा, हरिद्रा, दारुहरिद्रा, हिंगु, कटुकी, बला, कट्फलं, अनन्तमूलं, कमलं, चन्दनं, द्राक्षा, पद्मकं, देवदारु, मेदा, महामेदा, विदारी, काकोली, अश्वगंधा, पिप्पली, जातिपुष्पं, वंशरोचना, विडंगम्, नागरमुस्ता, गोक्षुरः, बृहतीद्वयम् प्रत्येकं १ तोला।

एषां क्वाथः चतुःप्रस्थः, गोघृतं चतुःप्रस्थं, शतावरीरसः द्विप्रस्थ, गोदुग्धं द्विप्रस्थम्।

विधि :—सिद्धं कृत्वा स्थापयेत् भाण्डे।

प्रयोग :—योनिव्यापत्तौ, मृतगर्भार्थे, गर्भपात भय दूरीकरणार्थे, वंध्यादोष हरणे वा योजनीयम्।

मात्रा—०॥–१ तोला, शर्करायुक्तम्। (सि. यो. सं.)

फलवर्तिः

इन्द्रयवः, मायुफलम्, विडंगम्, वापुंभा, स्फटिका–पुष्पिता, हरीतकी, आम्रहरिद्रा, वचा, चीमेड।

अग्निमन्थरसेन मर्दयेत्। बदरमात्रा गुटिका कार्या। योनौ धारयेत्।

(नूतन कल्पः)

बलातैलम् (महत्)

बलामूलक्वाथः, दशमूलक्वाथः, यवकोलकुलत्थानां क्वाथः, दुग्धम् प्रत्येकं ८ भागाः, तैलम् १ भागः।

कल्कद्रव्याणि :—मधुरो वर्ग, सैन्धवम्, अगुरुः, सर्जरसः, सरलः, देवदारु, त्रिफला, मांसी, पत्रं, तगरम्, पुनर्नवा, मंजिष्ठा, चन्दनं, कुष्ठं, एला, कोलः, अंजनम्, सारिवा, त्वक्, शतावरी, अश्वगंधा, शतपुष्पा प्रत्येकं योग्य भागः।

सर्वैः सिद्धम् तैलम् काचपात्रे स्थापयेत्।

प्रयोग :—सर्ववातविकारम्, सूतिकारोगं, वन्ध्यत्वम्, क्षीणशुक्रं, भग्नं, आक्षेपकं च अपनयति। मात्रा – १–२ तोलके पानाभ्यंगे वस्तौ च।

बालचातुर्भद्रचूर्णम्

मुस्ता, पिप्पली, अतिविषा, कर्कटशृंगी प्रत्येकं १ भागः।

मात्रा—२–८ गुंजाः। (सि. यो. सं.)

बिडालकलेपः

यष्टीमधु, गैरिकं, सिन्धूत्थं, दारुहरिद्रा (वा. शुण्ठी), रसांजनं प्रत्येकं १ तोला।

विधि :—जलेन पिष्ट्वा बहिर्लेपः कार्यः।

प्रयोग :—सर्वनेत्ररोगापहः। रक्तसंचयं वेदनां चापहरति।

बिल्वादिचूर्णम्

आमबिल्वमज्जा, शुण्ठी, मोचरसः, शुद्धविजया, धातकीपुष्पम् प्रत्येकं १ भागः, धान्यकं २ भागौ, मिशिः ४ भागाः। (सि. सं.)

बृहत्कस्तूरीभैरवरसः

कस्तूरी, कर्पूरम्, ताम्रभस्म, धातकीपुष्पं, वानरीबीजं, रौप्यभस्म, सुवर्णभस्म, मुक्तापिष्टिः, प्रवालभस्म, लोहभस्म, पाठा, विडंगम्, मुस्ता, शुण्ठी, उशीरम्, हरितालं, अभ्रकभस्म, आमलकं प्रत्येकं १ तोला, अर्कपत्रस्वरसस्य २ भावने।

प्रथमं कस्तूरीकर्पूर व्यतिरिक्तानां द्रव्याणां सम्यक् मर्दनम्। कस्तूरी कर्पूरयोः तदनन्तरम् निक्षेपणम्। तत्पश्चात् अर्कस्वरसस्य १ भावना। गुंजाद्वयमिता गुटिका कार्या।

मात्रा—२ गुंजा; अनुपानम्—आर्द्रकस्वरसः। (भै. र.)

बृहत्छागलादिघृतम्

छागमांसं क्षुण्णंकृत्वा, दशमूलं, अश्वगंधा, वाट्यालकी (बला) प्रत्येकं ४०० तोला। सर्वेषां ०। शेषो, जलेन सह, पृथक् पृथक् कृतः क्वाथः, सर्वे मिलित्वा ३२ प्रस्थाः। घृतं, गोदुग्धं, शतावरीरसः प्रत्येकं ५१२ तोला (२ आढकाः)।

कल्कद्रव्याणि :— जीवन्ती, मधुकं, द्राक्षा, काकोली, क्षीरकाकोली, नीलकमलं, मुस्ता, चन्दनं, रास्ना, शालिपर्णी, पृश्निपर्णी, सारिवाद्वयं, मेदा, महामेदा, कुष्ठं, जीवकः, ऋषभकः, शटी, दारुहरिद्रा, प्रियंगुका, त्रिफला, तगरम्, तालीशं, पद्मकं, एला, तमालपत्रं, शतावरी, नागवल्ली, जातिकुसुमं, धान्यकं, मंजिष्ठा, दाडिमं, देवदारु, रेणुकं, एलवालुकं, विडंगम्, जीरकं प्रत्येकं २ तोला।

सर्वैः घृतं पाचनीयम्। वस्त्रपूते शीते च शर्करा ६४ तोला प्रक्षेप्या।

प्रयोग :— सर्वेषु वातव्याधिषु, राजयक्ष्मणि, अपस्मारे, इन्द्रियध्वंसे, विषमज्वरे, मदात्यये, पक्षाघाते, नष्टशुक्रे, वन्ध्यत्वे, बालशोषे, नेत्रकर्णनासारोगे च।

मात्रा—१–२ तोला, दुग्धानुपानम्।

बृहत्मंजिष्ठादिक्वाथः (महामंजिष्ठादिक्वाथः)

मंजिष्ठा, मुस्ता, कुटजः, अमृता, कुष्ठं, शुण्ठी, भार्गी, कंटकारिका, वचा, निम्बः, दारुहरिद्रा, हरिद्रा, हरीतकी, बिभीतकं, आमलकं, पटोलः, कटुकी, विडंगं, असनः, चित्रकं, शतावरी, त्रायमाणा, पिप्पली, इन्द्रयवः, वासा, भृंगराजः, देवदारु, पाठा, खदिरः, चन्दनं, त्रिवृत्, वरुणः, किराततिक्तः, बाकुची, आरग्वधः, शाखोटकः, महानिम्बः, करंजफलं, अतिविषा, जलः (उशीरः), इन्द्रवारुणी, अनन्तमूलं, सारिवा, पर्पटः प्रत्येकं १ भागः। मात्रा—२–४ कर्षाः।

बृहद्वातचिंतामणिरसः

सुवर्णभस्म ३ तोला, रौप्यभस्म २ तोला, अभ्रकभस्म २ तोला, मुक्तापिष्टिः ३ तोला, प्रवालपिष्टिः ३ तोला, लोहभस्म ५ तोला, रससिंदूरम् ७ तोला।

घृतकुमारी रसेन संमर्द्य रक्तिद्वयमितां वटीं कुर्यात। (र. यो. सा.)

बोलपर्पटी

शु–पारदः १ तोला, शु–गन्धकं १ तोला, बोलचूर्णम् २ तोला।

मात्रा—६ रक्तिकाः। अनुपानम्...दुग्धम्। (यो. र.)

ब्राह्मीघृतम्

ब्राह्मीस्वरसः ८० तोला, गोघृतं पुराणं १२० तोला, गोदुग्धं २०० तोला।

कल्कद्रव्याणि :— यष्टिमधु, शतावरी, द्राक्षा, विदारी, वचा, कुष्ठं, विडंग, शंखपुष्पी, त्रिफला पृथक्, त्रिकटु पृथक्, हरिद्रा प्रत्येकं २ तोला।

सर्वम् एकध्यं कृत्वा घृतं पाचयेत्।

प्रयोग :— उन्मादे-अपस्मारे। मात्रा— १–२ तोला।

टिप्पणी :— योगरत्नाकरे, वचा–कुष्ठ–शंखपुष्पीणां कल्कैः एव घृतस्य २० तोला पाच्यते। अत्रोक्तानि सर्वाणि कल्कद्रव्याणि नोपयुज्यन्ते। द्रवार्थं गोदुग्धं अपि नैव गृहीतम्। (यो. र., व्या. वि.)

ब्राह्मीवटी

अभ्रकभस्म, संगेयशबपिष्टिः, अकीकपिष्टिः, माणिक्यपिष्टिः, चन्द्रोदयः, प्रवालपिष्टिः, कहेरबापिष्टिः, सुवर्णभस्म, मुक्तापिष्टिः प्रत्येकं ६ माषाः, जातिफलं, लवङ्गम्, कुष्ठम्, जातिपत्री कृष्णजीरकं, पिप्पली, त्वक्, अनीसून्, अश्वगन्धा, आकारकरभः, धान्यकं, वंशलोचनम्, एला, शंखपुष्पी, श्वेतचन्दनं, मिसिः, तेजपत्रम्, नागकेसरम्, रूमीमस्तकी, पिप्पलीमूलं, चित्रकमूलत्वक्, कुलिंजन प्रत्येकं ४ माषाः, कस्तूरी, अम्बरम्, ब्राह्मी, त्रिवृत्, अगुरुः, केसरम् प्रत्येकं १॥ तोला।

ब्राह्मीस्वरसस्य भावना १। गुंजाद्वयमितां गुटिकां कारयेत्। मात्रा — १–२ गुंजे। (सि. यो. सं.)

भल्लातकतैलम्

तैलं २ प्रस्थौ, भृंगराजस्वरसः ८ प्रस्थाः, कल्कद्रव्याणां कल्कः अर्धप्रस्थः, जलम् ८ प्रस्थं।

कल्कद्रव्याणि :— भल्लातकं, अर्कपत्रं, मरिचं, सैन्धवम्, द्वे हरिद्रे, चित्रकमूलत्वक् प्रत्येकं ५॥ तोला। सर्वम् एकध्यं पक्त्वा वस्त्रपूतं कारयेत्।

प्रयोग :— अभ्यंगात् कफवातोत्थाः नाडी–अपचीव्रणाः शाम्यन्ति।

भल्लातकादिघृतम्

भल्लातकानां क्वाथः ८० तोला, भल्लातककल्कः ५ तोला, घृतं २० तोला।

विधि :— भल्लातकानां २० तोला, ३२० तोला जलेन क्वथित्वा पादशेषं वस्त्रपूतं क्वाथं गृहीत्वा भल्लातककल्केन घृतं पाचयेत।

प्रयोगः — वातगुल्मे, रक्तगुल्मे च। कफगुल्मे तु मधुना समेतम् पिबेत्। मात्रा— ०॥ तोला शर्करया विमिश्रम्।

द्वितीयो विधिः—

भल्लातकानि ८ तोला, पंचमूलं २० तोला, विदारीगन्धा ४ तोला, जलम् ५०२ तोला, घृतम् २ प्रस्थौ।

आपोथ्य क्वाथः ०। ग्राह्यः। तस्मिन् क्षीरम् १०० तोलकं, कल्कं च प्रक्षिप्य घृतं साधयेत्।

कल्कद्रव्याणि—पिप्पली, नागरम्, वचा, विडंगं, सैन्धवं, हिंगु, यावशूकं, विडं, शटी, चित्रकं, मधुकं, रास्ना सर्वाणि कर्ष (१ तोला) प्रमाणेन।

प्रयोग :—कफगुल्मे, प्लीह्नि, पाण्डुरोगे, श्वासे, ग्रहणीरोगे, कासे च। मात्रा—१ तोला। (भै. र.)

भार्ग्यादिक्वाथः (द्वितीयः, लघुः)

भार्गी, गुडूची, मुस्ता, देवदारु, बृहती, शुण्ठी, कणा, पुष्करमूलम्। मात्रा—१-२ कर्षः। (भै. र.)

मंजिष्ठादिक्वाथः (लघुः)

मंजिष्ठा, बाकुची, चक्रमर्दः, निम्बः, हरीतकी हरिद्रा, धात्री, वासा, शतावरी, बला, नागबला, यष्टिमधुकं, इक्षुरकः (तालमखाना), पटोलः, गुडूची, रक्तचन्दनं प्रत्येकं १ भागः। क्वाथः कार्यः। मात्रा—१-२ कर्षः।

(भै. र. कुष्ठाधिकारः)

मधुरज्वरान्तकक्वाथः

चन्दनं, उशीरः, धान्यकं, बालकं, पर्पटः, मुस्ता, शुण्ठी प्रत्येकं १ भागः। मात्रा—२-४ कर्षाः। (यो. र.)

मल्लसिन्दूरम्

शु-मल्लः ५ तोला, शु-पारदः १० तोला, शु-बलिः १० तोला। कुमारी-स्वरसस्य १ भावना। वालुकायन्त्रे क्रमात् पचेत्।

मसिमिश्रणम्

अरिष्टफलत्वक्मसिः १ भागः, खदिरः १ भागः। मात्रा—१-४ गुंजाः।

(आर्यभिषक्)

महाज्वरांकुशरसः

पारदः, गन्धकं, वत्सनाभः प्रत्येकं १ तोला, कनकबीजं ३ तोला, शुण्ठी, मरिचं, पिप्पली प्रत्येकं ४ तोला।

मात्रा—२ गुंजा। अनुपानम्—जम्बीररसः आर्द्रकस्वरसो वा। (र. सा. सं.)

महातिक्तकं घृतम्

कल्कद्रव्याणि :—सप्तपर्ण, प्रतिविषा, शम्याकं, कटुरोहिणी, पाठा, मुस्ता, उशीरः, पद्मकाष्ठं, हरिद्रा, दारुहरिद्रा, सारिवा श्वेता, सारिवा-कृष्णा, इन्द्रयवः, यष्टिः, त्रायमाणा, त्रिफला, पटोलः, निम्बः, पर्पटक, धन्वयवासः, चन्दनं, पिप्पली, षड्ग्रन्था, विशाला, शतावरी, वासा, मूर्वा, अमृता, किरातिक्ता प्रत्येकं १ तोला, घृतं ३ शेर, जलं २४ शेर, धात्रीफलानां रसः ६ शेर।

कल्कद्रव्याणां कल्कं, घृतादीन् च एकत्र कृत्वा घृतं साधयेत्।

प्रयोग :—कुष्ठे, रक्तपित्ते, रक्तजेषु अर्शःसु, विसर्पे, अम्लपित्ते, वातरक्ते, पाण्डुरोगे, कामलायां, गुल्मे, प्रमेहपिटिकासु, भगंदरे।

मात्रा—१–२ तोला। (यो. र.)

महापैशाचघृतम्

मांसी, हरीतकी, वचा, श्वेतवचा, कपिकच्छूमूलं, प्रियालं, त्रायमाणा, शतपुष्पा, मिसिः, वृश्चिकाली, शालिपर्णी, अरणीमूलं, शतावरी, चोरकं, कटुरोहिणी, शिवा, वाराहीकंदः, गुग्गुलुः, नाकुली, कटभी, महापुरुषदन्ताः प्रत्येकं १ तोला।

विधि :—जलं अष्टगुणं, घृतं २ शेर, सर्वम् एकत्र कृत्वा घृतं पाचयेत्।

प्रयोग :—चातुर्थिकज्वर–उन्माद–अपस्मार–ग्रहपीडासु। मात्रा—१–२ तोला पानार्थम्।

महामृत्युंजयरसः

शु–मल्लः, शु–तालं, शु–वत्सनाभं, शु–जयपालः प्रत्येकं १ तोला, शु–हिंगुलं ४ तोला, श्वेतखदिरसारः ४ तोला, स्वर्णक्षीरीस्वरसस्य १ भावना।

मात्रा—०॥ गुंजा। अनुपानम्–आर्द्रकस्वरसः।

महारास्नादिक्वाथः

रास्ना ५० भागाः, धन्वयासः, बला, एरण्डमूलम्, देवदारुः, शठी, वचा, वासा, शुण्ठी, हरीतकी, चव्यम्, मुस्ता, पुनर्नवा, अमृता, वृद्धदारुकम्, शतपुष्पा

(मिशि:), गोक्षुर:, अश्वगंधा, अतिविषा, कृतमाल:, शतावरी, पिप्पली, सहचर:, धान्यकम् , कंटकारिका, बृहती प्रत्येकं १ भाग: ।

मात्रा—२–४ कर्षा: । (शा. सं.)

माषतैलम्

माषक्वाथ:, बलाक्वाथ:, रास्नाक्वाथ:, दशमूलक्वाथ:, यवकोलकुलत्थानांक्वाथ:, छागमांसक्वाथ: प्रत्येकं ४०० तोला, तैलम् १०० तोला, क्षीरम् १०० तोला ।

कल्कद्रव्याणि :—रास्ना, आत्मगुप्ता, सिन्धूत्थं, शतावरी, एरण्डमूलम् , मुस्तकं, जीवनीयगण:, बला, व्योष: प्रत्येकं १।। तोला ।

सर्वम् एकत्र कृत्वा तैलम् पचेत् ।

प्रयोग :—हस्तकम्पं, शिर:कम्पं, अवबाहुकं, पक्षाघातं, ऊर्ध्वजत्रुरोगान् नाशयेत् नस्य–अभ्यंग–पान बस्तिभि: ।

मात्रा—१–२ तोला ।

मूत्रलकषाय:

पुनर्नवामूलं, इक्षुमूलं, कुशमूलं, दर्भमूलं, कासमूलं, गोक्षुर:, खोरासानीयवानी, रक्तचन्दनं, अनंतमूलं, देवदारु, शतपुष्पा, धान्यकं, शाकफलं, काकमाची, कासनीबीजं, गुडूची, पाषाणभेद:, काकनज, कमलपुष्पं प्रत्येकं १ भाग: । क्वाथ: कार्य: ।

(सि. यो. सं.)

मेन्डल्स पेइन्ट

आयोडीन ५ ग्रेन, पोटास आयोडाईड २० ग्रेन, ओईलमेंथा ५ बिन्दव:, ग्लोसराईन १ औंस । मिश्रं कृत्वा काचकूप्यां स्थापयेत् ।

प्रयोग :—दन्तवेष्टपाके, गलपाके, गिलायुवृद्धौ, मुखपाके च कार्पास कृतोष्णोषया शलाकया प्रतिसारणम् लेपो वा ।

मेलेरियावटी

मत्स्या, भूनिम्ब:, निम्बत्वक्, सप्तपर्ण:, मामज्जक:, सिंकोनात्वक्, धत्तूर:, कुबेराक्ष: । एषां क्वाथं कृत्वा घन: कार्य: ।

प्रक्षेपद्रव्याणि :—अतिविषा, कुबेराक्षमज्जा, विषतिन्दुकं, ऐलेयक:, मन:शिला । मुद्गाभा गुटिका कार्या । मात्रा –२–४ वट्य: । (नूतन कल्प:)

यमानीषाडवम्

यमानी, तिन्तिडीकं, नागरं, अम्लवेतसं, दाडिमम् , बदरम् प्रत्येकं १ कर्षः, धान्यकं, सौवर्चलं, अजाजी, त्वक् प्रत्येकं ०।। कर्षः, पिप्पली १०० नंग, मरिचं २०० नंग, शर्करा १६ कर्षाः ।

एकत्र चूर्णयेत् । (चरक चि. अ. ८)

योगराजगुग्गुलुः (महान्)

नागरम् , पिप्पली, चव्यं, पिप्पलीमूलं, चित्रकं, भृष्टं हिंगु, अजमोदा, सर्षपः, श्वेतजीरकं, कृष्णजीरकं, रेणुका, इन्द्रयवः, पाठा, विडंगम् , गजपिप्पली, कटुका, अतिविषा, भार्गी, वचा, मूर्वा प्रत्येकं १ भागः, त्रिफलाचूर्णम् ४० भागाः, गुग्गुलुः ६० भागाः, वंगभस्म, रौप्यभस्म, नागभस्म, लोहभस्म, अभ्रकभस्म, मण्डूरभस्म, रससिन्दूरम् प्रत्येकं ४ भागाः ।

यावता पिण्डीभूतं स्यात् तावत्परिमाणं घृतं ग्राह्यम् । शाणमात्रा गुटिकाः कार्याः । मात्रा—३–६ गुटिकाः । अयमेव भस्मरहितः लघुयोगराजगुग्गुलुः इति कथ्यते । (शा. सं.)

रक्तशुद्धियोगः

गन्धकं १ भागः, मरिचं १ भागः, त्रिफला ६ भागाः ।

आरग्वध–क्वाथेन सह पिबेत् । मात्रा—०।–०।। कर्षः ।

रजःप्रवर्तिनी वटी

ऐलेयकः, बोलः, सौभाग्यपुष्पम् , भर्जितहिंगु, कासीसं, जटामांसी, शुद्धमल्लः प्रत्येकं १ भागः ।

गुंजा प्रमाणा गुटिका कार्या । मात्रा—२–४ वट्य । (नूतन कल्पः)

रसकर्पूरम्

शु–पारदः, गैरिकचूर्णम् , इष्टिकाचूर्णम् , खटिकाचूर्णम् , स्फटिकाचूर्णम् , सैन्धवचूर्णम् , वल्मीकमृत्तिका, क्षारलवणं, भाण्डरंजकमृत्तिका प्रत्येकं ५ तोला ।

ऊर्ध्वपातनयन्त्रे पाचयेत् । मात्रा—१–२ गुंजा । (भा. प्र.)

रसगुग्गुलुः

शु–पारदः १० गुंजाः, शर्करा ३० गुंजाः, शु–गुग्गुलुः ४० गुंजाः, घृतम् १० गुंजाः ।

सर्वमेकत्र मर्दयेत्। विंशतिवटिकाः कार्याः। पूर्वम् दिनत्रयं यावत् प्रत्यहं वटिकात्रयं भक्षयेत्। शेषा एकादशवटीः प्रत्यहं एकवटीक्रमेण एकादशदिनेषु समापयेत्। एवम् सप्ताहद्वयम् यावत् औषधप्रयोगः। (भै. र.)

रसपर्पटी

पारदः १० तोला, शु-गन्धकं १० तोला।

पारदमूर्च्छनाः—कुमारीस्वरसः, त्रिफलाक्वाथः, चित्रकक्वाथः—प्रत्येकं सप्तवारम्।

पारदमर्दनं :— जयन्तीपत्रं, एरण्डपत्रं, आर्द्रकपत्रं, काकमाची। (भै. र.)

रससिन्दूरम्

शु-पारदः ५ तोला, शु-गन्धकं ५ तोला, वटांकुराणां ३ भावनाः।

वालुकायन्त्रे विधिवत् साधयेत्। (यो. र.)

रसायनचूर्णम्

गुडूची, गोक्षुरः, आमलकं प्रत्येकं १ भागः।

मात्रा—०।-०॥ कर्षः। अनुपानम्—दुग्धम्।

रसोनादिवटी

रसोनः, शुद्धगन्धकं, जीरकं, सैन्धवम्, शुण्ठी, मरिचं, पिप्पली, घृतभर्जितहिंगु प्रत्येकं १ भागः।

निम्बुरसेन मर्दयेत्। मात्रा—३-६ गुंजाः। (वैद्यजीवन)

राजमृगाङ्करसः

पारदभस्म, स्वर्णभस्म, ताम्रभस्म प्रत्येकं १ तोला, मनःशिला, हरितालं, गन्धकं प्रत्येकं २ तोला।

एकीकृत्य वराटिकायां पूरयेत्। ततः अजाक्षीरेण टंकणम् पिष्ट्वा मुखं रुद्ध्वा गजपुटं दद्यात्।

मात्रा—१-२ गुंजे। अनुपानम्- पिप्पली मरिचं, क्षौद्रम्, घृतम्।

(भै. र.)

राढधूमादिवर्तिः

हिंगु, गृहधूमः बिड्लवणं, शुण्ठी, मरिचं, पिप्पली, गुडः प्रत्येकं १ भागः। मूत्रेण संमर्द्य अंगुष्ठसमा वर्तिर्विधेया। (यो. र.)

रामबाणरसः

शु–पारदः, वत्सनाभः, लवङ्गम् , बलिः प्रत्येकं १ तोला, मरिचं २ तोला, जातिफलं ०।। तोला ।

तिन्तिडीफलस्वरसेन मर्दनम् । मात्रा—२–३ गुंजाः । अनुपानम्—क्षौद्रम् । (भै. र.)

रास्नादिक्वाथः

रास्ना, यष्टिमधुकं, अमृता, एरण्डमूलं, बला, गोक्षुरः ।

क्वाथः कार्यः । रुबुतैलेन मिश्रितः अन्त्रवृद्धि आशु हरति । मात्रा—१–२ कर्षः । (भै. र.)

लक्ष्मीनारायणः

शु–गन्धकं, शु–टंकणं, शु–वत्सनाभः, शु–हिंगुलं, कटुरोहिणी, अतिविषा, पिप्पली, शक्रयवः, अभ्रकभस्म, सैन्धवम् प्रत्येकं १ तोला । दन्तीमूलक्वाथस्य ३ भावनाः, त्रिफलाक्वाथस्य ३ भावनाः ।

मात्रा—६ गुंजाः । अनुपानम्—आर्द्रकस्वरसः, मधु । (भै. र.)

लक्ष्मीविलासरसः

शु–पारदः ५ तोला, शु–तालं ५ तोला, खर्पर २।। तोला, वंगभस्म, ताम्रभस्म, अभ्रकभस्म, कान्तलोहभस्म, कांस्यभस्म, गन्धकं प्रत्येकं ५ तोला । भृंगराजस्वरसस्य ३ भावनाः, कुलत्थक्वाथस्य ३ भावनाः; एला, जातिफलं, तेजपत्रम् , लवङ्गम्, यवानी, जीरकं, शुण्ठी, मरिचं, पिप्पली, हरीतकी, बिभीतकं, आमलकं, प्रत्येकं समभागानां ३ भावनाः ।

मात्रा—०।।–१ वल्लः । (भै. र.)

लघुमालिनीवसन्तः

शुद्धखर्परः ८ तोला, श्वेतमरिचं ८ तोला, नवनीतं १। तोला । निम्बुस्वरस्य ४ भावनाः ।

मात्रा—२–४ गुंजाः । अनुपानम्—मधु वा दुग्धम् । (यो. र.)

लवणभास्करचूर्णम्

सामुद्रलवणम् १६ भागः, सौवर्चलम् १० भागः, बिड्लवणम् , सैन्धवम् , धान्यकं, पिप्पली, पिप्पलीमूलं, कृष्णजीरकं, पत्रम् , नागकेशरम् , तालीसपत्रम् , अम्लवेतसम् प्रत्येकं ४ भागाः, मरिचं, जीरकं, शुण्ठी प्रत्येकं २ भागाः, दाडिमम् ८ भागाः, त्वक् १ भागः, एला १ भागः । मात्रा—१।।–३ माषाः ।

लवंगादिवटी

लवंगम् ८ भागाः, बिभीतकमज्जा, पिप्पली, शक्करतिगाल प्रत्येकं ४ भागाः, कर्कटशृंगी २ भागौ, दाडिमफलत्वक् १ भागः, त्वक् २ भागौ, खदिरः १० भागाः, यष्टिमधुघनः २० भागाः, द्राक्षा १० भागाः, अर्कपुष्पं ५ भागाः, नवसादरः २ भागौ, कर्पूरम् १ भागः, सौभाग्यपुष्पं १ भागः।

मात्रा—२–१० वट्यः। (सि. यो. सं.)

लशुनतैलम्

लशुनम्, हरितालं, आमलकं प्रत्येकं ५ तोला, तैलम् १ प्रस्थः, दुग्धम् ४ प्रस्थाः, जलम् ४ प्रस्थाः।

विधि :— यथाविधि पाचयेत्।

प्रयोग :— कर्णं पूरणात् बाधिर्यं, कर्णशूलं, नादं च व्यपोहति।

(भै. र.)

लाक्षादितैलम्

तैलम् १ प्रस्थः (२५६ तोला), १/८ लाक्षाक्वाथः ४ प्रस्थाः (१०२४ तोला), दधिमस्तु ४ प्रस्थाः (१०२४ तोला)।

कल्कद्रव्याणि :— यष्टिमधु, निशा, मुस्ता, मूर्वा, कटुका, शतपुष्पा (मिसि र्वा), रास्ना, कर्पूरम् (वा चन्दनं), अश्वगंधा, देवदारु, निर्गुण्डीबीजं, कुष्ठं प्रत्येकं १ तोला। एतत् सर्वम् एकत्र कृत्वा तैलम् पाचयेत्।

प्रयोग :— विषमज्वरे, जीर्णज्वरे, राजयक्ष्मणि, कासे च, सगर्भायाः रक्तदर्शने, उरःक्षते च...सगर्भाणां गर्भपुष्टिकरम् अभ्यंगात्।

मात्रा— १–२ तोला; पानाभ्यंगार्थम्।

लीलाविलासरसः

शु-पारदः, गन्धकं, ताम्रभस्म, अभ्रकभस्म, अनारदानाचूर्णम्। हरीतकी, बिभीतकं, आमलकं एषां क्वाथस्य २५ भावनाः, भृंगराजस्वरसस्य २५ भावनाः।

मात्रा—५ गुंजाः। (यो. र.)

लोकनाथरसः

बुभुक्षितपारदः २ तोला, शु–गन्धकं २ तोला, कपर्दिका ८ तोला, सौभाग्यं १ तोला, गोदुग्धेन विमर्दयेत्, शंखखंडं ८ तोला।

मात्रा—६ गुंजाः। अनुपानम्—मरिचानि। (शा. सं.)

लोध्रासवः (मध्वासवः)

लोध्रः, शटी, पुष्करमूलम्, एला, मूर्वा, विडंगम्, हरीतकी, बिभीतकं, आमलकं, यमानी, चव्यं, प्रियंगुः, पूगीफलम्, इन्द्रवारुणी, किराततिक्तम्, कटुका, भार्गी, तगरम्, चित्रकमूलं, पिप्पलीमूलं, कुष्ठं, अतिविषा, पाठा, नखम्, मुस्ता, नागकेशरम्, तमालपत्रम्, मरिचं, इन्द्रयवः, लघु इन्द्रवारुणी प्रत्येकं १ भागः। जलम् १०२४ भागाः। क्वाथः, चतुर्थांश शेषः। मधु १२८ भागाः।

विधिवत् साधयेत्। मात्रा—१–२ कर्षः। (च. सं. चि. अ. ६)

लोहगर्भः

कासीसं, गोदन्ती प्रत्येकं १० तोला।

कुमारीस्वरसेन भावयित्वा पुटत्रयं दद्यात्। मात्रा—१–४ गुंजाः। अनुपानम् मधु, दुग्धम्।

लोहासवः

लोहचूर्णं, पिप्पली, मरिचं, शुण्ठी, हरीतकी, बिभीतकं, आमलकं, यवानिका, विडंगं, मुस्ता, चित्रकं प्रत्येकं १६ भागाः, धातकीकुसुमं ८० भागाः, मधु २५६ भागाः, गुडः ४०० भागाः, जलम् २०४८ भागाः।

एकत्र संयोज्य घृतभाण्डे विनिक्षिपेत्। मासैकम् संधातव्यम्। ततो जातरसम् भवति। मात्रा—१–२ कर्षः। (शा. सं.)

वरुणादिक्वाथः

वरुणत्वक्, अगस्तिकुसुमं, बिल्वः, अपामार्गः, चित्रकः, प्रत्येकं १ भागः, अग्निमन्थद्वयं (लघु–वृद्ध) २ भागौ, शिग्रुद्वयं (श्वेत–रक्त) २ भागौ, बृहतीद्वयं २ भागौ, सैरेयकत्रयं (श्वेत–नील–पीत) ३ भागाः, मूर्वा, मेषशृङ्गी, किराततिक्तम्, अजशृङ्गी, बिम्बी, करञ्जः, शतावरी प्रत्येकं १ भागः।

मात्रा—२–३ कर्षाः। (भै. र.)

वसन्तकुसुमाकररसः

सुवर्णभस्म २ तोला, रजतभस्म २ तोला, वंगभस्म, नागभस्म, कान्तलोहभस्म प्रत्येकं ३ तोला, रससिन्दूरं, अभ्रकभस्म, प्रवालभस्म, मुक्ताभस्म प्रत्येकं ४ तोला। गोदुग्धं, इक्षुस्वरसः, वासास्वरसः, श्वेतचन्दनक्वाथः, उशीरक्वाथः, सुगन्धबालाक्वाथः, हरिद्रास्वरसः, कदलीस्वरसः, कमलस्वरसः, मालतीकुसुमं प्रत्येकं ७ भावनाः, कस्तूरीजलं १ भावना। वल्लमितः सेव्यः, सिताज्यमधुसंयुतः।

(भै. र.)

वातविध्वंसनरसः

शु–पारदः, गन्धकं, ताम्रभस्म, लोहभस्म, सुवर्णमाक्षिकभस्म प्रत्येकं १ तोला, वत्सनाभं २ तोला, जयपालः १ तोला, शु–हरितालं १ तोला, त्रिकटु १८ तोला। निर्गुण्डीस्वरसः, सूरणद्रवः, अर्कदुग्धं, अग्निमन्थक्वाथः, भृंगराजरसः, धत्तूररसः प्रत्येकं ७ भावनाः।

मात्रा—२ रक्तिका। अनुपानम्—मरिचचूर्णम्। (बृ. नि. र.)

वासाघृतम्

वासाशाखा, वासादलं, वासामूलं प्रत्येकं ४० तोला, जलम् २४ शेर, घृतम् ६४ तोला, वासापुष्पकल्कः १६ तोला।

विधिः—वासायाः शाखाः, दलानि, मूलानि च संकुट्य चतुर्थांशः क्वाथः विधेयः। पश्चात् पुष्पकल्कं दत्वा घृतं पाचयेत्।

प्रयोगः—रक्तपित्ते, उरःक्षते, राजयक्ष्मणि, क्षयजे–क्षतजे च कासे।

मात्रा—१–२ तोला, मधुना सह। (यो. र.)

वृक्षाम्लघृतम्

प्रयोगः—उष्णं कृत्वा, हस्तपाददारी रोगे अभ्यंगः, ओष्ठस्फुटने अभ्यंगः।

वासादिक्वाथः

वासा, हरिद्रा, धान्यकम्, अमृता, भार्गी, पिप्पली, शुण्ठी, कंटकारिका प्रत्येकं १ भागः।

द्वितीयः पाठः

वासा, गुडूची, त्रिफला (पृथक्) भूनिम्बः, निम्बत्वक् प्रत्येकं १ भागः।

प्रयोगः—कामला रक्तपित्तादौ।

मात्रा—२–४ कर्षः।

वासावलेहः (बृहत्)

बासापत्रम् ४०० तोला, जलम् ८००० तोला, २०० तोला जले शेषे, क्वाथं गालयित्वा शर्करा ४०० तोला दत्वा अवलेहवत् कार्यम्। निम्नानां च प्रक्षेपो विधेयः।—

प्रक्षेपद्रव्याणि :– त्वक्, एला, नागरं, पिप्पली, धान्यकं, तालीसपत्रम्, पिप्पलीमूलं, वंशरोचना, कंपिल्लकं, तमालपत्रम्, नागकेसरम्, मरिचं, चविका, जीरकं, नागरमुस्तकं, कट्फलं, कुष्ठं प्रत्येकं २ तोला, मधु १६० तोला।

